6. T adds here *yogaḥ* (*ldan-pa*), which can however equally well be understood from the previous sentence.
7. T om. *sthāna*.
8. B om. *ato*, supplied from T.
9. B om. *tad*, supplied from T. Cf. the introductory sentence to verse 13 below.
10. *nāsataḥ śakyas*, B; *mi-nus*, T, confirmed by C.



तस्मै धर्मदिवाकराय विमलज्ञानावभासत्विषे
सर्वारम्वण[1]रागदोषतिमिरव्याघातकर्त्रे नमः ॥ ९ ॥

अनेन किं दर्शितम् ।

अचिन्त्याद्वयनिष्कल्पशुद्धिव्यक्तिविपक्षतः ।
यो येन च विरागोऽसौ धर्मः सत्यद्विलक्षणः ॥ १० ॥

अनेन समासतोऽष्टाभिर्गुणैः संगृहीतं धर्मरत्नमुद्भावितम् । अष्टौ गुणाः कतमे । अचिन्त्यत्वमद्वयता निर्विकल्पता शुद्धिरभिव्यक्तिकरणं प्रतिपक्षता विरागो विरागहेतुरिति ।

निरोधमार्गसत्याभ्यां संगृहीता विरागिता ।
गुणैस्त्रिभिस्त्रिभिश्चैते[2] वेदितव्ये यथाक्रमम् ॥ ११ ॥

एषामेव यथाक्रमं षण्णां गुणानां त्रिभिराद्यैरचिन्त्याद्वयनिर्विकल्पतागुणैर्निरोधसत्यपरिदीपनाद्विरागसंग्रहो वेदितव्यः । त्रिभिरवशिष्टैः शुद्ध्यभिव्यक्तिप्रतिपक्षतागुणैर्मार्गसत्यपरिदीपनाद्विरागहेतुसंग्रह इति । यश्च विरागो निरोधसत्यं येन च विरागो मार्गसत्येन तदुभयमभिसमस्य व्यवदानसत्य(7*b*)द्वयलक्षणो विरागधर्म इति परिदीपितम् ।

अतर्क्यत्वादलाप्यत्वादार्यज्ञानादचिन्त्यता ।
शिवत्वादद्वयाकल्पौ शुद्ध्यादि त्रयमर्कवत् ॥ १२ ॥

समासतो निरोधसत्यस्य त्रिभिः कारणैरचिन्त्यत्वं वेदितव्यम् । कतमैस्त्रिभिः । असत्सत्सदसन्नोभयप्रकारैश्चतुर्भिरपि तर्कागोचरत्वात् । सर्वरुतरवितघोषवाक्पथनिरुक्तिसंकेतव्यवहाराभिलापैरनभिलाप्यत्वात् । आर्याणां च प्रत्यात्मवेदनीयत्वात् ।

1. In this text *ārambaṇa* replaces the more usual *ālambana*. Cf. Pali *ārammaṇa*.
2. *tribhis tribhir eva*, By, *di-dag dan yon-tan gsum gsum-kyis*, T. *Ete* is required to show that the line refers to the two Truths.

तत्र निरोधसत्यस्य कथमद्वयता निर्विकल्पता च वेदितव्या[1] । यथोक्तं भगवता[2] । शिवोऽयं शारिपुत्र धर्मकायोऽद्वयधर्माविकल्पधर्मा । तत्र द्वयमुच्यते कर्म क्लेशाश्च । विकल्प उच्यते कर्मक्लेशसमुदयहेतुरयोनिशोमनसिकारः । तत्प्रकृतिनिरोधप्रतिवेधाद् द्वयविकल्पासमुदाचारयोगेन यो दुःखस्यात्यन्तमनुत्पाद इदमुच्यते दुःखनिरोधसत्यम् । न खलु कस्यचिद्धर्मस्य विनाशाद्दुःखनिरोधसत्यं परिदीपितम् । यथोक्तम् । अनुत्पादानिरोधे मञ्जुश्रीश्चित्तमनोविज्ञानानि न[3] प्रवर्तन्ते । यत्र चित्तमनोविज्ञानानि न प्रवर्तन्ते तत्र न कश्चित्परिकल्पो येन परिकल्पेनायोनिशोमनसिकुर्यात् । स योनिशोमनसिकारप्र(8a)युक्तोऽविद्यां न समुत्थापयति । यच्चाविद्यासमुत्थानं तद् द्वादशानां भवाङ्गानामसमुत्थानम् । साजातिरिति विस्तरः[4] । यथोक्तम्[5] । न खलु भगवन् धर्मविनाशो दुःखनिरोधः । दुःखनिरोधनाम्ना भगवन्ननादिकालिकोऽकृतोऽजातोऽनुत्पन्नोऽक्षयः क्षयापगतः नित्यो ध्रुवः शिवः शाश्वतः प्रकृतिपरिशुद्धः सर्वक्लेशकोशविनिर्मुक्तो गङ्गा[6]वालिकाव्यतिवृत्तैरविनिर्भागैरचिन्त्यैर्बुद्धधर्मैः[7] समन्वागतस्तथागतधर्मकायो देशितः । अयमेव च भगवंस्तथागतधर्मकायोऽविनिर्मुक्तक्लेशकोशस्तथागतगर्भः सूच्यते । इति सर्वविस्तरेण यथासूत्रमेव दुःखनिरोधसत्यव्यवस्थानमनुगन्तव्यम् ।

अस्य खलु दुःखनिरोधसंज्ञितस्य तथागतधर्मकायस्य प्राप्तिहेतुरविकल्पज्ञानदर्शनभावनामार्गस्त्रिविधेन साधर्म्येण दिनकरसदृशः वेदितव्यः । मण्डलविशुद्धिसाधर्म्येण सर्वोपक्लेशमलविगतत्वात् । रूपाभिव्यक्तिकरणसाधर्म्येण सर्वाकारज्ञेयावभासकत्वात् । तमःप्रतिपक्षसाधर्म्येण च सर्वाकारसत्यदर्शन[8]विबन्धप्रतिपक्षभूतत्वात् ।

1. *veditavye* would be more regular.
2. From the *Anūnatvāpūrṇatvanirdeśaparivarta* according to C.
3. B om. *na*, which T has. C omits the sentence. The quotation is noted by O as from the *Jñānālokālaṁkārasūtra*.
4. T had *ityādi vistaraḥ*.
5. From the *Āryaśrīmālāsūtra*.
6. T reads *Gaṅgānadī°*, which is perhaps preferable.
7. C adds *amuktajñair* and another adjective ('not different' ?).
8. *sarvākāratv(?)adarśana°*, B; *dben mthoṅ-baḥi dgegs-kyiernam-pa thams-cad-kyi*, T. C om. *satya*.



विबन्धः पुनरभूतवस्तुनिमित्तारम्बणमनसिकारपूर्विका रागद्वेषमोहोत्पत्तिरनुशयपर्युत्थानयोगात् । अनुशयतो हि बालानाम(8b)भूतमतत्स्वभावं वस्तु शुभाकारेण वा निमित्तं भवति रागोत्पत्तितः । प्रतिघाकारेण वा द्वेषोत्पत्तितः । अविद्याकारेण वा मोहोत्पत्तितः । तच्च रागद्वेषमोहनिमित्तमयथाभूतमारम्बणं कुर्वतामयोनिशोमनसिकारश्चित्तं पर्याददाति । तेषामयोनिशोमनसिकारपर्यवस्थितचेतसां रागद्वेषमोहानामन्यतमक्लेशसमुदाचारो भवति । ते ततोनिदानं कायेन वाचा मनसा रागजमपि कर्माभिसंस्कुर्वन्ति । द्वेषजमपि मोहजमपि कर्माभिसंस्कुर्वन्ति । कर्मतश्च पुनर्जन्मानुबन्ध एव भवति । एवमेषां बालानामनुशयवतां निमित्तग्राहिणामारम्बणचरितानामयोनिशोमनसिकारसमुदाचारात्[1] क्लेशसमुदयः । क्लेशसमुदयात् कर्मसमुदयः । कर्मसमुदयाज्जन्मसमुदयो भवति । स पुनरेष सर्वाकारक्लेशकर्मजन्मसंक्लेशो बालानामेकस्य धातोर्यथाभूतमज्ञानाददर्शनाच्च[2] प्रवर्तते ।

स च तथा द्रष्टव्यो यथा परिगवेषयन्न तस्य[3] किंचि[4]न्निमित्तमारम्बणं वा पश्यति । स यदा न[5] निमित्तं नारम्बणं वा पश्यति तदा भूतं पश्यति । एवमेते धर्मास्तथागतेनाभिसंबुद्धाः समतया समा इति[6] । य एवमसतश्च निमित्तारम्बणस्यादर्शनात् सतश्च यथाभूत(9a)स्य परमार्थसत्यस्य दर्शनात् तदुभयोरनुत्क्षेपाप्रक्षेपसमताज्ञानेन सर्वधर्मसमताभिसंबोधः सोऽस्य सर्वाकारस्य तत्त्वदर्शनविबन्धस्य प्रतिपक्षो वेदितव्यो यस्योदयादितरस्यात्यन्तमसंगतिरसमवधानं प्रवर्तते । स खल्वेष धर्मकायप्राप्तिहेतुरविकल्पज्ञानदर्शनभावनामार्गो विस्तरेण यथासूत्रं **प्रज्ञापारमिता**नुसारेणानुगन्तव्यः ।

अतो महायानधर्मरत्नादवैवर्तिकबोधिसत्त्वगणरत्नप्रभावनेति तदनन्तरं तदधिकृत्य श्लोकः ।

1. °*samudācārā*, B. T reads °*samudayāt* (*kun ḥbyuṅ-ba-las*).
2. T om. *adarśanāc ca*, but C gives it.
3. B om. *tasya*; *deḥi*, T. C implies the text reading.
4. *kaṁcin*, B.
5. B om. *na*, which is required by the context.
6. T om. *iti*, and B has an illegible hieroglyphic for the first *i*.

ये सम्यक् प्रतिविध्य सर्वजगतो नैरात्म्यकोटिं शिवां
तच्चित्तप्रकृतिप्रभास्वरतया. क्लेशास्वभावेक्षणात् ।
सर्वत्रानुगतामनावृतधियः पश्यन्ति संबुद्धतां[1]
तेभ्यः सत्त्वविशुद्ध्यनन्तविषयज्ञानेक्षणेभ्यो नमः ॥ १३ ॥

अनेन किं दर्शितम् ।

यथावद्यावदध्यात्मज्ञानदर्शनशुद्धितः ।
धीमतामविवर्त्यानामनुत्तरगुणैर्गणः ॥ १४ ॥

अनेन समासतोऽवैवर्तिकबोधिसत्त्वगणरत्नस्य द्वाभ्यामाकाराभ्यां[2] यथावद्भाविकतया यावद्भाविकतया च लोकोत्तरज्ञानदर्शनविशुद्धितोऽ[3]नुत्तरगुणान्वितत्वमु[4]द्भावितम् ।

यथावत्तज्जगच्छान्तधर्मतावगमात् स च ।
प्रकृतेः परिशुद्धत्वात् क्लेशस्यादिक्षयेक्षणात्[5] ॥ १५ ॥

तत्र यथावद्भाविकता कृत्स्न(*9b*)स्य पुद्गलधर्माख्यस्य[6] जगतो यथावन्नैरात्म्यकोटेरव[7]गमाद्वेदितव्या । स चायमवगमोऽत्यन्तादिशान्तस्वभावतया पुद्गलधर्माविनाशयोगेन समासतो द्वाभ्यां कारणाभ्यामुत्पद्यते । प्रकृतिप्रभास्वरतादर्शनाच्च[8] चित्तस्यादिक्षयनिरोधदर्शनाच्च[9] तदुपक्लेशस्य । तत्र या चित्तस्य

1. *sambaddhatāṁ*, B apparently.

2. T reads *kāraṇābhyām* (*rgyu*) for *ākārābhyam*. For *yathāvadbhāvikatā* and *yāvadbhāvikatā* see *Bodhisattvabhūmi* (ed. Wogihara), Index s.v., though used somewhat differently there. T translates them by *ji-lta-ba-bzhin yod-pa* and *ji-sñed yod-pa*.

3. °*visuddhi 'nuttara*°, B; *dag-paḥi phyir*, T.

4. °*ānvitam*, B; *ldan-pa-ñid*, T. C om. the entire sentence.

5. °*ādikṣaṇāt*, B (two syllables short); *gdoṅ-nas zad-phyir* (*ādikṣayāt*), T. That the two defective readings should be combined is shown by the third sentence of the commentary.

6. °*dharmākṣasya*, B; *chos daṅ gaṅ-zag ces-bya-baḥi*, T.

7. *koṭer anavagamād*, B; C and T om. the negative.

8. *pratiprabhāsvaratādarśāc ca*, B.

9. B om. *dha*.



प्रकृतिप्रभास्वरता यश्च तदुपक्लेश इत्येतद् द्वयमनास्रवे धातौ कुशलाकुशलयोश्चित्तयोरेकचरत्वाद् द्वितीयचित्तानभिसंधानयोगेन परमदुष्प्रतिवेध्यम् । अत आह[1] । क्षणिकं भगवन् कुशलं चित्तम् । न क्लेशैः संक्लिश्यते[2] । क्षणिकमकुशलं चित्तम् । न संक्लिष्टमेव तच्चित्तं क्लेशैः[3] । न भगवन् क्लेशास्तच्चित्तं स्पृशन्ति । कथमत्र भगवन्नस्पर्शनधर्मि चित्तं तमःक्लिष्टं भवति । अस्ति च भगवन्नुपक्लेशः । अस्त्युपक्लिष्टं चित्तम् । अथ च पुनर्भगवन् प्रकृतिपरिशुद्धस्य चित्तस्यो[4]पक्लेशार्थो दुष्प्रतिवेध्यः । इति विस्तरेण यथावद्भाविकतामारभ्य दुष्प्रतिवधार्थनिर्देशो[5] यथासूत्रमनुगन्तव्यः ।

यावद्भाविकता ज्ञेयपर्यन्तगतया धिया ।
सर्वसत्त्वेषु सर्वज्ञधर्मतास्तित्वदर्शनात्[6] ॥ १६ ॥

तत्र यावद्भाविकता सर्वज्ञेयवस्तुपर्यन्तगतया लोकोत्तरया प्रज्ञया सर्व-[7]सत्त्वेष्वन्तशस्ति[8]र्यग्योनिगतेष्वपि तथागतगर्भास्तित्वदर्शनाद्वेदितव्या । तच्च दर्शनं बोधिसत्त्वस्य प्रथमायामेव बोधिसत्त्वभूमावुत्पद्यते सर्वत्रगार्थेन[9] धर्मधातुप्रतिवेधात् ।

1. From the *Āryaśrīmālāsūtra*.

2. B om. *śya*.

3. B is not clear, reading these two sentences as one and having an illegible character after *citta*, which I take to be *nna* (i.e. *cittan na saṁkliṣṭam*). The text above agrees with T and C, except that T om. *tac*.

4. B om. from °*pakleśārtho* to *loko*° four lines below, and the passage has been added above in a xiv century hand.

5. T, if not corrupt, seems to read *duspratìvedhāntaranirdeśo* (*rtogs-par bkaḥ-baḥi bar bstan-pa*).

6. C treats this kārikā as prose and gives a very free rendering.

7. B om. *sarva*, supplied from T and rendered necessary by the kārikā.

8. *antaśa*, B.

9. °*gāthena*, B. T reads *sarvatragārthe* (*don-du*).

इत्येवं योऽवबोधस्तत्प्रत्यात्मज्ञानदर्शनम्[1] ।
तच्छुद्धिरमले धातावसङ्गाप्रतिघा ततः ॥ १७ ॥

इत्येवमनेन प्र(10*a*)कारेण यथावद्भाविकतया च यावद्भाविकतया च यो लोकोत्तरमार्गावबोधस्तदार्याणां प्रत्यात्ममनन्यसाधारणं लोकोत्तरज्ञानदर्शनमभिप्रेतम् । तच्च समासतो द्वाभ्यां कारणाभ्यामितरप्रादेशिकज्ञानदर्शनमुपनिधाय सुविशुद्धिरित्युच्यते । कतमाभ्यां द्वाभ्याम् । असङ्गत्वादप्रतिहतत्वाच्च । तत्र यथावद्भाविकतया सत्त्वधातुप्रकृतिविशुद्धविषयत्वादसङ्गम् यावद्भाविकतयानन्तज्ञेयवस्तुविषयत्वादप्रतिहतम् ।

ज्ञानदर्शनशुद्ध्या*[2] बुद्धज्ञानादनुत्तरात् ।
अवैवर्त्याद्भवन्त्यार्याः शरणं सर्वदेहिनाम् ॥ १८ ॥

इतीयं ज्ञानदर्शनशुद्धि[3]रविनिवर्तनीयभूमिसमारूढानां बोधिसत्त्वानामनुत्तरायास्तथागतज्ञानदर्शनविशुद्धेरुपनिषद्गतत्वादनुत्तरा वेदितव्या तदन्येभ्यो वा दान[4]शीलादिभ्यो बोधिसत्त्वगुणेभ्यो यद्योगादविनिवर्तनीया बोधिसत्त्वाः शरणभूता भवन्ति सर्वसत्त्वानामिति ।

श्रावकसंघरत्नाग्रहणं बोधिसत्त्वगणरत्नानन्तरं तत्पूजानर्हत्वात्[5] । न हि जातु पण्डिता बोधिसत्त्वश्रावकगुणान्तरज्ञा महाबोधिविपुलपुण्यज्ञानसंभारापूर्यमाणज्ञान[6]करुणामण्डलमप्रमेयसत्त्वधातुगणसंताना[7]वभासप्रत्युपस्थितमनुत्तरतथागत-

1. *pratyātmavedyajñāna*°, B (two syllables in excess). T om. *tedya* and appears to omit *iti*, reading *eva* (*ñid*) instead. C treats the verse as prose.

2. Pāda *a* is one syllable short in B; T has nothing to represent it and C is no help.

3. T om. °*śuddhir*, but C has it.

4. T om. *dāna*°, but C has it. These ablatives are governed by *anuttarā*. *Vā*, for which T has *ñid*, is here equivalent to *eva*.

5. *tatprajñānatatvāt*, B; *de mchod-par ḥos-pa ma-yin-paḥi-phyir*, T, which C corroborates. C adds after this sentence a kārikā enumerating the ten *vaśitās* of the Bodhisattva with a commentary on it.

6. *śes-rab daṅ sñiṅ-rje* (*prajñākaruṇā*°), T.

7. T om. *gaṇasaṁtāna*, which is required to balance *svasaṁtāna* below.



पूर्णचन्द्र(10*b*)गमनानुकूलमार्गप्रतिपन्नं बोधिसत्त्वनवचन्द्रमुत्सृज्य प्रादेशिकज्ञाननिष्ठागतमपि तारारूपवत् स्वसंतानावभासप्रत्युपस्थितं श्रावकं नमस्यन्ति । परहितक्रियाशयविशुद्धेः[1] संनिश्रयगुणेनैव हि प्रथमचित्तोत्पादिकोऽपि बोधिसत्त्वो निरनुक्रोशमनन्यपोषि[2]गण्यमनास्रवशीलसंवरविशुद्धिनिष्ठागतमार्यश्रावकमभिभवति । प्रागेव तदन्यैर्दशवशितादिभिर्बोधिसत्त्वगुणैः । वक्ष्यति हि ।

यः शीलमात्मार्थकरं[3] बिभर्ति
दुःशीलसत्त्वेषु दयावियुक्तः ।
आत्मंभरिः[4] शीलधनप्रशुद्धो[5]
विशुद्धशीलं न तमाहुरार्यम् ॥
यः शीलमादाय परोपजीव्यं
करोति तेजोऽनिलवारिभूवत् ।
कारुण्यमुत्पाद्य परं परेषु
स शीलवांस्तत्प्रतिरूपकोऽन्य इति ॥

तत्र केनार्थेन किमधिकृत्य भगवता शरणत्रयं प्रज्ञप्तम् ।

शास्तृशासनशिष्यार्थैरधिकृत्य त्रियानिकान् ।
कारत्रयाधिमुक्तांश्च प्रज्ञप्तं[6] शरणत्रयम् ॥ १९ ॥

1. T reads *rnam-par ma-dag-paḥi phyir-ro* (°*āśayāviśuddheḥ*), taking it as an adjunct to the previous sentence; but C confirms B. But should not the reading be °*viśuddhisaṁniśraya*° ?

2. *Poṣin* is recorded by the *PW* only from the *Kathāsaritsāgara*.

3. *ātmārthikaraṁ*, B; *bdag-don byed-par*, T. The source of these two verses is not known.

4. This is perhaps the earliest recorded occurrence of *ātmambhari*, which is known from the *Amarakośa* and the *Harṣacarita* (Schmidt, *Nachträge*).

5. °*dhanasaśuddha*, B against the metre; *nor-gyis rab dag-pa*, T. *Śudh* with *pra* is not recorded elsewhere, but *praśuddhi* occurs *MBh.* (Poona ed.), V, 37, 29, in exactly the same position in a triṣṭubh, having apparently been chosen for metrical reasons.

6. B om. *pra*, and T seems to read *vijñaptam* (*rnam-par bzhag-pa*); but the repeated use of *prajñaptam* in the commentary makes the text reading certain.

बुद्धः शरणमग्र्यत्वाद् द्विपदानामिति शास्तृगुणोद्भावनार्थेन बुद्धभावायोपगतान् बोधिसत्त्वान् पुद्गलान् बुद्धे च परमकारक्रियाधिमुक्तानधिकृत्य देशितं प्रज्ञप्तम् ।

धर्मः शरणमग्र्यत्वाद्विरागाणामिति शास्तुः शासन[1]गुणोद्भावनार्थेन स्वयं प्रतीत्य[2] गम्भीरधर्मानुबोधायोपगतान् प्र(11*a*)त्येकबुद्धयानिकान् पुद्गलान् धर्मे च परमकारक्रियाधिमुक्तानधिकृत्य देशितं प्रज्ञप्तम् ।

संघः शरणमग्र्यत्वाद्गणानामिति शास्तुः शासने सुप्रतिपन्नशिष्यगुणोद्भावनार्थेन परतः श्रवघोषस्या[3]नुगमायोपगतान् श्रावकयानिकान् पुद्गलान् संघे च परमकारक्रियाधिमुक्तानधिकृत्य देशितं प्रज्ञप्तम् । इत्यनेन समासतस्त्रिविधेनार्थेन षट् पुद्गलानधिकृत्य प्रभेदशो भगवता संवृतिपदस्थानेन सत्त्वानामनुपूर्वनया[4]वतारार्थमिमानि त्रीणि शरणानि देशितानि प्रज्ञप्तानि ।

त्याज्यत्वान् मोषधर्मत्वादभावात् सभयत्वतः ।
धर्मो द्विधा[5]र्यसंघश्च नात्यन्तं शरणं परम् ॥ २० ॥

द्विविधो धर्मः । देशनाधर्मोऽधिगमधर्मश्च । तत्र देशनाधर्मः सूत्रादिदेशनाया[6] नामपदव्यञ्जनकायसंगृहीतः । स च मार्गाभिसमयपर्यवसानत्वात् कोलोपम[7] इत्युक्तः । अधिगमधर्मो[8] हेतुफलभेदेन द्विविधः । यदुत मार्गसत्यं निरोध-

1. T om. *śāsana*.

2. B reads *svayaṁ gambhīrapratītyadharmā*°, but T and C give the order followed above. C gives an expanded commentary at this point.

3. *sravaghoṣāyonu*°, B; *thos-paḥi sgraḥi rjesu*, T. The dative does not seem to be a possible construction.

4. T's *tsheg-pa-la rim-gyis* suggests *anupūrvayāna*°; C probably had the text reading.

5. *vidhā*°, B; *chos rnams* (for *rnam*) *gñis*, T. 'the twofold dharma', C.

6. The text is uncertain, though the meaning is clear. I follow B; but T runs *mdoḥi sde-la sogs-pa bstan-pa brjod-pa-ste min* etc. (apparently *sūtrāntādideśanocyate nāma*). C does not show the exact wording, but probably read *sūtrādi*°.

7. *kola*, 'boat', is only known from *Divy.*, 56, and the lexicons.

8. °*dhamo*, B.



सत्यं च । येन यदधिगम्यत इति कृत्वा । तत्र मार्गः संस्कृतलक्षणपर्यापन्नः[1] । यत् संस्कृतलक्षणपर्यापन्नं तन् मृषामोषधर्मि । यन् मृषामोषधर्मि तदसत्यम् । यदसत्यं तदनित्यम् । यदनित्यं तदशरणम् । यश्च तेन मार्गेण निरोधोऽधिगतः सोऽपि श्रावकनयेन प्रदीपोच्छेदवत् क्लेशदुःखाभावमात्रप्रभावितः । न चाभावः[2] शरणमशरणं वा (11*b*)भवितुमर्हति ।

संघ इति त्रैयानिकस्य गणस्यैतदधिवचनम् । स च नित्यं सभयस्तथागतशरणगतो[3] निःसरणपर्येषी शैक्षः सकरणीयः प्रतिपन्नकश्चानुत्तरायां सम्यक्संबोधाविति[4] । कथं सभयः । यस्मादर्हतामपि क्षीणपुनर्भवानामप्रहीणत्वाद्वासनायाः सततसमितं सर्वसंस्कारेषु[5] तीव्रा भयसंज्ञा प्रत्युपस्थिता भवति स्याद्यथापि नामोत्क्षिप्तासिके[6] वधकपुरुषे तस्मात्तेऽपि नात्यन्तसुखनिःसरणमधिगताः । न हि शरणं शरणं[7] पर्येषते । यथैवा[8]शरणाः सत्त्वा येन तेन भयेन भीतास्ततस्ततो निःसरणं पर्येषन्ते तद्वदर्हतामप्यस्ति तद्भयं यतस्ते भयाद्भीतास्तथागतमेव शरणमुपगच्छन्ति । यश्चैवं सभयत्वाच्छरणमुपगच्छत्यवश्यं भयान्निःसरणं स पर्येषते[9] । निःसरणपर्येषित्वाच्च भयनिदानप्रहाणमधिकृत्य शैक्षो भवति सकरणीयः । शैक्ष-

1. B omits many words in this passage, reading *mārgaḥ saṁskṛtalakṣaṇaparyāpannaṁ / tan mṛsāmoṣadharmi tad asatyaṁ / yad asatyaṁ nityaṁ tad aśaraṇaṁ*. I follow T, but C, which agrees with it in form, adds two extra terms, both meaning 'not true', which I cannot determine.

2. *ca bhāvaḥ*, B; C and T as in text.

3. °*śaragato*, B.

4. T's *zhugs-pa ma-yin-no* indicates the reading *sakaraṇīyo 'pratipannas*; it omits *iti* at the end.

5. °*saṁskāre*, B; T and C show the plural.

6. *nāmotkṣiptāstike*, B; *ral-gri gdeṅs-paḥi*, T. There is possibly an omission in the text here, as C attributes most of this sentence and probably those that follow to the *Āryaśrīmālāsūtra*; cf. O, p. 146, n. 5, for the reference. There should be some allusion to the fact that it is a quotation.

7. B om. one *śaraṇam*; C and T as in text.

8. The characters *thaiva* are uncertain in B, and I would have read *yadvad*, if the vowel of the first character had not been clearly *ai*.

9. B om. *niḥsaraṇaṁ sa paryeṣate*; *de ni..ṅes-par ḥbyuṅ-ba tshol-ba*, T, which is confirmed by C.

त्वात् प्रतिपन्नको भवत्यभयमार्षभस्थानमनुप्राप्तुं यदुतानुत्तरां सम्यक्संबोधिम् । तस्मात्सोऽपि तदङ्गशरणत्वा[1]न्नात्यन्तं शरणम् । एवमिमे द्वे शरणे पर्यन्तकाले शरणे इत्युच्येते ।

जगच्छरणमेकत्र बुद्धत्वं पारमार्थिकम् ।
मुनेर्धर्मशरीरत्वात् तन्निष्ठत्वाद्गणस्य च ॥ २१ ॥

अनेन तु पूर्वोक्तेन विधिनानुत्पादानिरोधप्रभावितस्य मुनेर्व्यवदानसत्यद्वय[2]-विरागधर्मकायत्वाद् धर्मकायविशुद्धिनि(12a)ष्ठाधिगमपर्यवसानत्वाच्च त्रैया-निकस्य गणस्य पारमार्थिकमेवात्राणेऽशरणे लोकेऽपरान्तकोटिसममक्षयशरणं नित्यशरणं ध्रुवशरणं[3] यदुत तथागता अर्हन्तः[4] सम्यक्संबुद्धाः । एष च नित्य-ध्रुवशिवशाश्वतैकशरणनिर्देशो[5] विस्तरेणा**र्यश्रीमालासू**त्रानुसारेणानुगन्तव्यः ।

रत्नानि दुर्लभोत्पादान् निर्मलत्वात् प्रभावतः ।
लोकालंकारभूतत्वादग्रत्वान् निर्विकारतः ॥ २२ ॥

समासतः षड्विधेन रत्नसाधर्म्येणैतानि बुद्धधर्मसंघाख्यानि त्रीणि रत्नान्यु-च्यन्ते । यदुत दुर्लभोत्पादभाव[6]साधर्म्येण बहुभिरपि कल्पपरिवर्तैरनवाप्तकुशल-मूलानां तत्समवधानाप्रतिल[7]म्भात् । वैमल्यसाधर्म्येण सर्वाचारमलविगतत्वात्[8] । प्रभावसाधर्म्येण षडभिज्ञाद्यचिन्त्यप्रभावगुणयोगात् । लोकालंकारसाधर्म्येण सर्वजगदाशयशोभानिमित्तत्वात् । रत्नप्रतिवर्णिकाग्र्यसाधर्म्येण लोकोत्तरत्वात् । स्तुतिनिन्दाद्यविकारसाधर्म्येणासंस्कृतस्वभावत्वादिति ।

1. B om. *ṇa*.
2. T adds *lakṣaṇa* (*mtshan-ñid*) after *dvaya*, but C has no trace of the word.
3. T adds *skyabs ni gcigs* (*śaraṇam ekam*).
4. *Tathāgatārhantaḥ*, B.
5. T om. *nirdeśo*.
6. T om. *bhāva*.
7. °*dhānaprati*°, B, but possibly the *ā* is added above the line after *n*; T shows the negative required by the context.
8. So B, but the text is uncertain. T has *rnam-pa thams-cad-du* (*sarvākāra*°), and C translates as if having *sarvasāsrava-dharmavigatatvāt*.



रत्नत्रयनिर्देशानन्तरं यस्मिन् सत्येव[1] लौकिकलोकोत्तरविशुद्धियोनि[2]रत्न-त्रयमुत्पद्यते तदधिकृत्य श्लोकः ।

समला तथताथ निर्मला विमला बुद्धगुणा[3] जिनक्रिया ।
विषयः परमार्थदर्शिनां शुभरत्नत्रयसर्गको यतः ॥ २३ ॥

अनेन किं परिदीपितम् ।

गोत्रं रत्नत्रयस्यास्य विष(12b)यः सर्वदर्शिनाम् ।
चतुर्विधः स चाचिन्त्यश्चतुर्भिः कारणैः क्रमात् ॥ २४ ॥

तत्र समला तथता यो धातुरविनिर्मुक्तक्लेशकोशस्तथागतगर्भ इत्युच्यते । निर्मला तथता स एव[4] बुद्धभूमावाश्रयपरिवृत्तिलक्षणो यस्तथागतधर्मकाय इत्यु-च्यते । विमलबुद्धगुणा[5] ये तस्मिन्नेवाश्रयपरिवृत्तिलक्षणे तथागतधर्मकाये[6] लोको-त्तरा दशबलादयो बुद्धधर्माः । जिनक्रिया तेषामेव दशबलादीनां बुद्धधर्माणां प्रतिस्वमनुत्तरं कर्म यदनिष्ठितम[7]विरतमप्रतिप्रश्रब्धं[8] बोधिसत्त्वव्याकरणकथां नोपच्छिनत्ति । तानि पुनरिमानि चत्वारि स्थानानि यथासंख्यमेव चतुर्भिः कारणै-रचिन्त्यत्वात् सर्वज्ञविषया[9] इत्युच्यन्ते । कतमैश्चतुर्भिः ।

शुद्ध्युपक्लिष्टतायोगात् निःसंक्लेशविशुद्धितः ।
अविनिर्भागधर्मत्वादनाभोगाविकल्पतः ॥ २५ ॥

तत्र समला तथता युगपदेककालं विशुद्धा च संक्लिष्टा[10] चेत्यचिन्त्यमेतत् स्थानं गम्भीरधर्मनयाधिमुक्तानामपि प्रत्येकबुद्धानामगोचरविषयत्वात् । यत

1. e.c.; *saty esta* (?), B; T om. *eva*.
2. *viśuddhiyāni*, B; *dag-pa skye-baḥi gnas*, T.
3. *buddhaguṇa*, B.
4. T om. *sa eva*.
5. Should one not read *vimalā Buddha*° ?
6. °*kāya*, B; *sku de-ñid-la yod-pa* (°*kāye sthitā* ?), T.
7. B may read *aviṣṭhitam*. T has *med-par ma-gyur-zhin*, 'not becoming non-existent'.
8. B om. *bdhaṁ*.
9. T adds *ye-śes* (*jñāna*) after *sarvajña*, but C does not show it and verse 24 proves it not to be required.
10. T evidently read *viśuddhā yā saṁkliṣṭā yety*.

आह[1]। द्वाविमौ देवि धर्मौ दुष्प्रतिवेध्यौ । प्रकृतिपरिशुद्धिचित्तं दुष्प्रतिवेध्यम् । तस्यैव चित्तस्योपक्लिष्टता दुष्प्रतिवेध्या । अनयोर्देवि धर्मयोः श्रोता त्वं वा भवेरथवा महाधर्मसमन्वागता बोधिसत्त्वाः । शेषाणां देवि सर्वश्रावकप्रत्येकबुद्धानां तथागतश्रद्धागमनीया(13*a*)वेवैतौ[2] धर्माविति ।

तत्र निर्मला तथता पूर्वमलासंक्लिष्टा पश्चाद्विशुद्धेत्यचिन्त्यमेतत् स्थानम् । यत आह[3] । प्रकृतिप्रभास्वरं चित्तम् । तत्तथैव ज्ञानम् । तत उच्यते । एकक्षणलक्षण[4]समायुक्तया प्रज्ञया सम्यक्संबोधिरभिसंबुद्धेति ।

तत्र विमला बुद्धगुणाः पौर्वापर्येणैकान्तसंक्लिष्टायामपि पृथग्जनभूमावविनिर्भागधर्मतया निर्विशिष्टा विद्यन्त इत्यचिन्त्यमेतत् स्थानम् । यत आह[5] ।

न स कश्चित्सत्त्वः सत्त्वनिकाये संविद्यते यत्र तथागतज्ञानं[6] न सकलमनुप्रविष्टम् । अपि तु संज्ञाग्राहतस्तथागतज्ञानं न प्रज्ञायते । संज्ञाग्राहविगमात् पुनः सर्वज्ञज्ञानं स्वयंभूज्ञानमसङ्गतः प्रभवति । तद्यथापि नाम भो जिनपुत्र त्रिसाहस्रमहासाहस्र[7]लोकधातुप्रमाणं महापुस्तं भवेत् । तस्मिन् खलु पुनर्महापुस्ते त्रिसाहस्रमहासाहस्रलोकधातुः सकलसमाप्त आलिखितो भवेत् । महापृथिवीप्रमाणेन महापृथिवी । द्विसाहस्रलोकधातुप्रमाणेन द्विसाहस्रलोकधातुः । साहस्रलोकधातुप्रमाणेन साहस्रलोकधातुः[8] । चातुर्द्वीपिक[9]प्रमाणेन चातुर्द्वीपिकाः । महासमुद्रप्रमाणेन महासमुद्राः । जम्बूद्वीपप्रमाणेन जम्बूद्वीपाः । पूर्वविदेहद्वीपप्रमाणेन पूर्वविदेहद्वीपाः । गो(13*b*)दावरीद्वीपप्रमाणेन गोदावरीद्वीपाः[10] । उत्तरकुरुद्वीपप्रमाणेनोत्तरकुरुद्वीपाः । सुमेरुप्रमाणेन सुमेरवः ।

1. The quotation is from the *Āryaśrīmālāsūtra*.
2. B om. *vai*, supplied from T's *rtogs-par bya-ba-ñid*. C has 'only'.
3. From the *Dhāraṇīśvararājasūtra* according to O.
4. B om. *kṣaṇa* and T *lakṣaṇa*; C has both.
5. Neither C nor O say where this long quotation comes from.
6. B om. *naṁ*.
7. B repeats *mahāsāhasra*.
8. B om. *lokadhātu*, which T has.
9. B adds *lokadhātu* after *cāturdvīpika*°, but T omits it.
10. So B, but the name should be Godāna or Godānīya; T has *nub-kyi ba-laṅ spyod-kyi gliṅ*, equivalent to Aparagocara-dvīpa. C does not give the names of the dvīpas.



भूम्यवचरदेवविमानप्रमाणेन भूम्यवचरदेवविमानानि । कामावचरदेवविमानप्रमाणेन कामावचरदेवविमानानि । रूपावचरदेवविमानप्रमाणेन रूपावचरदेवविमानानि । तच्च महापुस्तं त्रिसाहस्रमहासाहस्रलोकधात्वायामविस्तरप्रमाणं भवेत् । तत्खलु पुनर्महापुस्तमेकस्मिन् परमाणुरजसि प्रक्षिप्तं भवेत् । यथा चैकपरमाणुरजसि[1] तन्महापुस्तं प्रक्षिप्तं भवेत् तथान्येषु[2] सर्वपरमाणुरजःसु तत्प्रमागान्येव महानुस्तान्यभ्यन्तरप्रविष्टानि भवेयुः । अथ कश्चिदेव पुरुष उत्पद्यते पण्डितो निपुणो व्यक्तो मेधावी तत्रोपगमिकया मीमांसया समन्वागतः । दिव्यं चास्य चक्षुः समन्तपरिशुद्धं प्रभास्वरं भवेत् । स दिव्येन चक्षुषा व्यवलोकयति । इदं महापुस्तमेवंभूतमिहैव[3] परीत्ते परमाणुरजस्यनुतिष्ठते[4] । न कस्यचिदपि[5] सत्त्वस्योपकारिभूतं भवति । तस्यैवं स्यात् । यन्न्वहं महावीर्यबलस्थाम्ना एतत्परमाणुरजो भित्त्वा एतन्महापुस्तं[6] सर्वजगदुपजीव्यं कुर्याम्[7] । स महावीर्यबलस्थाम संजनयित्वा सूक्ष्मेण वज्रेण तत्परमाणुरजो भित्त्वा यथाभिप्रायं तन्महापुस्तं सर्वजगदुपजीव्यं कुर्यात् । यथा चै(14*a*)कस्मात् तथाशेषेभ्यः[8] परमाणुभ्यस्तथैव कुर्यात् । एवमेव भो जिनपुत्र तथागतज्ञानमप्रमाणज्ञानं[9] सर्वस(VII*a*)त्त्वोपजीव्यज्ञानं सर्वसत्त्वचित्तसंतानेषु सकलमनुप्रविष्टम् । सर्वाणि च तानि सत्त्वचित्तसंतानान्यपि[10] तथागतज्ञानप्रमाणानि[11] । अथ च पुनः संज्ञाग्राहविनि-

1. B om. *si*.
2. The reading °*ānyeṣu* is uncertain in B, and T and C have nothing to correspond.
3. *idaṁ khalu punar evaṁbhutam*, B; *ḥdi lta-bur gyur-paḥi dar-yug chen-po ḥdi*, T. C apparently had the text reading also.
4. Note *anutiṣṭhate* Ātmanepada, a usage not included in Pāṇini, i, 3, 22 ff.
5. B om. *api*; *yaṅ*, T.
6. I have left the two hiatuses as probably a peculiarity of the sūtra's style. T adds *vajreṇa* (*rdo-rjes*) before *bhittvā*; C has 'by some *upāya*'.
7. *kuryāt*, B.
8. T adds another epithet, *mthaḥ-dag*, something like *samasta*.
9. B repeats *apramāṇajñānam*.
10. B om. *api*, which A and T have.
11. T has a negative and read °*jñānāpramāṇāni*.

बद्धा बाला न जानन्ति न[1] प्रजानन्ति नानुभवन्ति न साक्षात्कुर्वन्ति तथागतज्ञानम् । ततस्तथागतोऽसङ्गेन तथागतज्ञानेन सर्वधर्मधातुसत्त्वभवनानि व्यवलोक्याचार्यसंज्ञी भवति । अहो बत इमे सत्त्वा यथावत् तथागतज्ञानं न प्रजानन्ति । तथागतज्ञानानुप्रविष्टाश्च । यन्न्वहमेषां सत्त्वानामार्येण मार्गोपदेशेन सर्वसंज्ञाकृतबन्धनापनयनं[2] कुर्यां यथा स्वयमेवार्यमार्ग[3]बलाधानेन महतीं संज्ञाग्रन्थिं विनिवर्त्य तथागतज्ञानं प्रत्यभिजानीरन् । तथागतसमतां चानुप्राप्नुयुः । ते तथागतमार्गोपदेशेन सर्वसंज्ञाकृतबन्धनानि[4] व्यपनयन्ति । अपनीतेषु च सर्वसंज्ञाकृतबन्धनेषु,[5] तत् तथागतज्ञानम[6]प्रमाणं भवति सर्वजगदुपजीव्यमिति ।

तत्र जिनक्रिया युगपत्सर्वत्र सर्वकालमनाभोगेनाविकल्पतो[7] यथाशयेषु यथावैनयिकेषु[8] सत्त्वेष्वक्षूण[9]मनुगुणं प्रवर्तत इत्यचिन्त्यमेतत् स्थानम् । यत आह[10] । संक्षेपमात्रकेणावतारणार्थं सत्त्वानामप्रमाणमपि तथागतकर्म प्रमाण(14b)तो निर्दिष्टम् । अपि तु कुलपुत्र यत्तथागतस्य भूतं तथागतकर्म तदप्रमाणमचिन्त्यमविज्ञेयं सर्वलोकेन । अनुदाहरणमक्षरैः । दुःसंपादं परेभ्यः । अधिष्ठितं सर्वबुद्धक्षेत्रेषु । समतानुगतं सर्वबुद्धैः । समतिक्रान्तं सर्वाभोगक्रियाभ्यः । निर्विकल्पमाकाशसमतया । निर्नीताकारणं धर्मधातुक्रियया । इति[11] विस्तरेण यावद्विशुद्धवैडूर्यमणिदृष्टान्तं कृत्वा निर्दिशति । तदनेन कुलपुत्र पर्यायेणैवं वेदितव्यमचिन्त्यं तथागतकर्म समतानुगतं च सर्वतोऽनवद्यं च त्रिरत्नवंशानुपच्छेत्तृ च । यत्राचिन्त्ये तथागतकर्मणि प्रतिष्ठितस्त[12]थागत आकाशस्वभावतां च कायस्य न विजहाति

1. B om. *na*.
2. °*bandhanā apanayanaṁ*, B; A as in text.
3. T read *jñāna* (*ye-śes*) for *mārga*.
4. B om. *abandhan*, supplied from T.
5. B om. *sarva* and *abandhan*, supplied from T.
6. B om. *ma*; *ye-śes tshad-med-pa*, T; A begins line 3 *ānam apramāṇaṁ*.
7. °*kalpayato*, B.
8. *yatha vainaikeṣu*, B; the two characters before *vainayikeṣu* in A are illegible, but do not look like *yathā*; *gdul-bya ji-lta-ba bzhin-du* (*yathāvadvineyeṣu* ?), T.
9. e.c.; *akṣūṇatvaṁ*, B; A illegible. Cf. *Mvy.*, Andersen-Helmer Smith's *Pali Dict.* s. *akkhaṇavedhin*, and *Daśabh.*, 69.
10. From the *Dhāraṇīśvararājasūtra* (O).
11. B om. *iti*, supplied from T. A is missing here.
12. B repeats *Tathāgatakarmaṇi pratiṣṭhitas*.



सर्वबुद्धक्षेत्रेषु च दर्शनं ददाति । अनभिलाप्यधर्मतां च वाचो न विजहाति यथारुतविज्ञप्त्या च सत्त्वेभ्यो धर्मं देशयति । सर्वचित्तारम्बणविगतश्च सर्वसत्त्वचित्तचरिताशयांश्च प्रजानातीति ।

बोध्यं बोधिस्तदङ्गानि बोधनेति यथाक्रमम् ।
हेतुरेकं पदं त्रीणि प्रत्ययस्तद्विशुद्धये ॥ २६ ॥

एषां खल्वपि चतुर्णामर्थपदानां सर्वज्ञेयसंग्रहमुपादाय प्रथमं बोद्धव्यपदं[1] द्रष्टव्यम् । तदनुबोधो बोधिरिति द्वितीयं बोधिपदम् । बोधेरङ्गभूता बुद्धगुणा इति त्रितीयं बोध्यङ्गपदम् । बोध्यङ्गैरेव बोधनं परेषामिति चतुर्थं बोधनापदम् । इतीमानि (15a)चत्वारि पदान्यधिकृत्य हेतुप्रत्ययभावेन रत्नत्रयगोत्रव्यवस्थानं वेदितव्यम् ।

तत्रैषां चतुर्णां पदानां प्रथमं लोकोत्तरधर्मबीजत्वात् प्रत्यात्मयोनिशोमनसिकारसंनिश्रयेण तद्विशुद्धिमुपादाय त्रिरत्नोत्पत्तिहेतुरनुगन्तव्यः । इत्येवमेकं पदं हेतुः । कथं त्रीणि प्रत्ययः । तथागतोऽनुत्तरां सम्यक्संबोधिमभिसंबुध्य दशबलादिभिर्बुद्धधर्मैर्द्वात्रिंशदाकारं तथागतकर्म कुर्वन्[2] परतो(VIIb)घोषसंनिश्रयेण[3] तद्विशुद्धिमुपादाय त्रिरत्नोत्पत्तिप्रत्ययोऽनुगन्तव्यः । इत्येवं त्रीणि प्रत्ययः । अतः परमेषामेव चतुर्णां पदानामनुपूर्वमवशिष्टेन ग्रन्थेन विस्तरविभागनिर्देशो वेदितव्यः ।

तत्र समलां तथतामधिकृत्य यदुक्तं सर्वसत्त्वास्तथागतगर्भा[4] इति तत् केनार्थेन[5] ।

1. *bodhyavya*°, B.
2. B om. *kurva*, but the *n* still remaining shows the text to be the correct restitution of T's *mdzad-pa-na*. A is missing here.
3. *ghoṣayanniśrayeṇa*, B.
4. It is not clear if B intends °*garbha* or °*garbhā*, but cf. below in the first sentence after verse 28, where A and B both have °*garbhā*.
5. The order of the text is confused in T and C. A's order cannot be determined, as it has only a portion of the commentary from *trividhenā*° to *punas trayā*°. T is obviously wrong; it has verse 28 followed by the commentary as far as *Bhagavatā*, then verse 27 followed by the sentence *yenārthena* to *nirdekṣyāmi*, then the commentary from *yad uta* to *bhaviṣyati*, ending with *uddānam*. C inserts 27 after *uddānam*, which is impossible.

बुद्धज्ञानान्तर्गमात्[1] सत्त्वराशे–
स्तन्नैर्मल्यस्याद्वयत्वात् प्रकृत्या ।
बौद्धे गोत्रे तत्फलस्योपचारा–
दुक्ताः सर्वे देहिनो बुद्धगर्भाः ॥ २७ ॥
संबुद्धकायस्फरणात् तथताव्यतिभेदतः ।
गोत्रत[2]श्च सदा सर्वे बुद्धगर्भाः शरीरिणः ॥ २८ ॥

समासतस्त्रिविधेनार्थेन सदा सर्वसत्त्वास्तथागतगर्भा इत्युक्तं भगवता । यदुत सर्वसत्त्वेषु तथागतधर्मकायपरिस्फरणार्थेन तथागततथताव्यतिभेदार्थेन तथागतगोत्रसंभवार्थेन च । एषां पुनस्त्रयाणामर्थपदानामुत्तरत्र **तथागतगर्भसूत्रानुसारेण** निर्देशो भविष्यति । (15*b*)पूर्वतरं तु येनार्थेन सर्वत्राविशेषेण प्रवचने सर्वाकारं तदर्थसूचनं भवति तदप्यधिकृत्य[3] निर्देक्ष्यामि । उद्दानम् ।

स्वभावहेत्वोः फलकर्मयोग–
वृत्तिष्ववस्थास्वथ सर्वगत्वे[4] ।
सदाविकारित्वगुणेष्वभेदे
ज्ञेयोऽर्थसंधिः परमार्थधातोः ॥ २९ ॥

समासतो दशविधमर्थमभिसंधाय परमतत्त्वज्ञानविषयस्य तथागतधातोर्व्यवस्थानमनुगन्तव्यम् । दशविधोऽर्थः कतमः[5] । तद्यथा स्वभावार्थो हेत्वर्थः फलार्थः कर्मार्थो योगार्थो वृत्त्यर्थोऽवस्थाप्रभेदार्थः सर्वत्रगार्थोऽविकारार्थोऽभेदार्थश्च । तत्र स्वभावार्थं हेत्वर्थं चारभ्य श्लोकः ।

सदा प्रकृत्यसंक्लिष्टः शुद्धरत्नाम्बराम्बुवत् ।
धर्माधिमुक्त्यधिप्रज्ञासमाधिकरुणान्वयः ॥ ३० ॥

1. e.c.; *jñānāt(?)ta*māt*, B; *saṅs-rgyas ye-śes..zhugs*, T; 'not separate', C.
2. B om. *ta*.
3. *api kṛtya*, B.
4. *avasthāneṣv atha sarvatve*, B (against the metre); *gnas-skabs de-bzhin kun-tu ḥgro-bahi don (...sarvagārthe)*, T; not in A.
5. B om. *katamaḥ*, found in A and T.



तत्र पूर्वेण श्लोकार्धेन किं दर्शयति ।

प्रभावानन्यथाभावस्निग्धभावस्वभावतः ।
चिन्तामणिनभोवारिगुणसाधर्म्य[1]मेषु हि ॥ ३१ ॥

य एते त्रयोऽत्र[2] पूर्वमुद्दिष्टा एषु त्रिषु यथासंख्यमेव स्वलक्षणं सामान्यलक्षणं चारभ्य तथागतधातोश्चिन्तामणिनभोवारिविशुद्धिगुणसाधर्म्यं वेदितव्यम् । तत्र तथागतधर्मकाये तावच्चिन्तितार्थसमृद्ध्यादि[3] प्रभावस्वभावतां स्वलक्षणमारभ्य चिन्तामणिरत्नसाधर्म्यं वेदितव्यम् । तथतायामनन्यथाभावस्वभावतां स्वलक्षणमारभ्याकाशसाधर्म्यं वेदितव्यम् । तथागतगोत्रे सत्त्वकरुणास्निग्धस्वभावतां[4] स्वलक्षणमारभ्य (16*a*)वारिसाधर्म्यं वेदितव्यम् । सर्वेषां चात्र सदात्यन्तप्रकृत्यनुपक्लिष्टतां प्रकृतिपरिशुद्धिं सामान्यलक्षणमारभ्य तदेव चिन्तामणिनभोवारिवि[5]शुद्धिगुणसाधर्म्यं वेदितव्यम् ।

तत्र परेण श्लोकार्धेन किं दर्शितम् ।

चतुर्धावरणं धर्म[6]प्रतिघोऽप्यात्मदर्शनम् ।
संसारदुःखभीरुत्वं सत्त्वार्थं निरपेक्षता ॥ ३२ ॥
इच्छन्तिकानां तीर्थ्यानां[7] श्रावकाणां स्वयंभुवाम् ।
अधिमुक्त्यादयो धर्माश्चित्वारः शुद्धिहेतवः ॥ ३३ ॥

समासत इमे त्रिविधाः सत्वाः सत्त्वराशौ संविद्यन्ते । भवाभिलाषिणो विभवाभिलाषिणस्तदुभयान[8]भिलाषिणश्च । तत्र भवाभिलाषिणो द्विविधा वेदितव्याः ।

1. B om. *dha*.
2. T om. *ya*, and A corrects on margin from the text to *ya ete trayo 'rthā atra*.
3. C has a lacuna from *samṛddhi* to the end of the commentary on verse 31.
4. °*svabhāvatāsvalakṣaṇam*, A, which has °*svabhāvatām* in the previous sentence.
5. B om. *vi*, but T shows it (*rnam-par*).
6. *dharme*, B; A as in text.
7. *tīrthānāṁ*, B; A as in text.
8. °*ubhayābhi*° B; but T, C and the explanation require the negative.

मोक्षमार्गप्रतिहताशा अपरिनिर्वाणगोत्रकाः सत्त्वा ये संसारमेवेच्छन्ति न निर्वाणं तन्नियतिपतिताश्चेहधार्मिका एव[1] । तदेकत्या महायानधर्मविद्विषो या[2]नधिकृत्यैतदुक्तं भगवता। नाहं तेषां शास्ता न ते मम श्रावकाः। तानहं शारिपुत्र तमसस्तमोऽन्तरमन्धकारान् महान्धकारगामिनस्तमोभूयिष्ठा इति वदामि ।

तत्र विभवाभिलाषिणो द्विविधाः । अनुपायपतिता उपायपतिताश्च । तत्रानुपायपतिता अपि त्रिविधाः । इतोबाह्या बहुनानाप्रकाराश्चरकपरिव्राजकनिर्ग्रन्थिपुत्र[3]प्रभृतयोऽन्यतीर्थ्याः । इहधार्मिकाश्च तत्सभागचरिता एव श्राद्धा अपि दुर्गृहीतग्राहिणः । ते च पुनः कतमे । यदुत पुद्गलदृष्टय(16*b*)श्च परमार्थानधिमुक्ता यान् प्रति भगवता शून्यतानधिमुक्तो निर्विशिष्टो भवति तीर्थिकैरित्युक्तम्[4] । शून्यतादृष्टयश्चाभिमानिका येषामिह तद्विमोक्षमुखेऽपि शून्यतायां माद्यमानानां शून्यतैव दृष्टिर्भवति यानधिकृत्याह । वरं खलु काश्यप सुमेरुमात्रा पुद्गलदृष्टिर्न त्वेवाभिमानिकस्य शून्यतादृष्टिरिति[5] । तत्रोपायपतिता अपि द्विविधाः । श्रावकयानीयाश्च सम्यक्त्वनियाममवक्रान्ताः प्रत्येकबुद्धयानीयाश्च ।

तदुभयानभिलाषिणः पुनर्महायानसंप्रस्थिताः परमतीक्ष्णेन्द्रियाः सत्त्वा ये नापि संसारमिच्छन्ति यथेच्छन्तिका[6] नानुपायपतितास्तीर्थिकादिवन् नाप्युपायपतिताः श्रावकप्रत्येकबुद्धवत् । अपि तु संसारनिर्वाणसमतापत्ति[7]मार्गप्रतिपन्नास्ते भवन्त्यप्रतिष्ठितनिर्वाणाशया निरुपक्लिष्टसंसारगतप्रयोगा दृढकरुणाध्याशयप्रतिष्ठितमूलपरिशुद्धा इति[8] ।

1. *ihadhārmika* means 'Buddhist'. A om. *eva,* which B and T have.

2. A's viib ends with the character *ya*. C attributes the quotation to the *Anūnatvāpūrṇatvanirdeśaparivarta.*

3. B om. *putra,* which seems necessary; T's *gcer-bu-pa* leaves it vague. For *caraka* see *PW* s.v.

4. Quotation not identified by C or O.

5. The quotation is to be found with slight differences of wording in *Kāś. P.*, p. 95.

6. For the *icchantikas* see *Laṅkāvatārasūtra,* p. 65, line 16, to p. 66, line 9.

7. When this phrase is repeated lower down, B has the more natural *samatāpti*°, which perhaps should be read here.

8. T om. *iti.*



तत्र ये सत्त्वा भवाभिलाषिण इच्छन्तिकास्तन्नियतिपतिता[1] इहधार्मिका एवोच्यन्ते मिथ्यात्वनियतः[2] सत्त्वराशिरिति । ये विभवाभिलाषिणोऽप्यनुपायपतिता उच्यन्तेऽनियतः सत्त्वराशिरिति[3] । ये वि[4]भवाभिलाषिण उपायपतितास्तदुभयानभिलाषिणश्च[5] समताप्तिमार्गप्रतिपन्नास्त उच्यत्ते सम्यक्त्वनियतः सत्त्वराशिरिति । (17*a*)तत्र महायानसंप्रस्थितान् सत्त्वाननावरणगामिनः स्थापयित्वा य इतोऽन्ये सत्त्वास्तद्यथा । इच्छन्तिकास्तीर्थ्याः श्रावकाः प्रत्येकबुद्धाश्च । तेषामिमानि चत्वार्यावरणानि तथागतधातोरनधिगमायासाक्षात्क्रियायै संवर्तन्ते । कतमानि च चत्वारि । तद्यथा महायानधर्मप्रतिघ इच्छन्तिकाना[6]मावरणं यस्य प्रतिपक्षो महायानधर्माधिमुक्तिभावना बोधिसत्त्वानाम् । धर्मेष्वात्मदर्शनमन्यतीर्थनामा[7]वरणं यस्य प्रतिपक्षः प्रज्ञापारमिताभावना बोधिसत्त्वानाम् । संसारे दुःखसंज्ञा दुःखभीरुत्वं श्रावकयानिकानामावरणं यस्य प्रतिपक्षो गगनगञ्जादिसमाधिभावना बोधिसत्त्वानाम् । सत्त्वार्थविमुखता सत्त्वार्थनिरपेक्षता प्रत्येकबुद्धयानिकानामावरणं यस्य प्रतिपक्षो महाकरुणाभावना बोधिसत्त्वानामिति ।

एतच्चतुर्विधमावरणमेषां चतुर्विधानां सत्त्वानां यस्य प्रतिपक्षानिमांश्चतुरोऽधिमुक्त्यादीन्[8] भावयित्वा बोधिसत्त्वा निरुत्तरार्थधर्मकायविशुद्धिपरमतामधिगच्छन्त्येभिश्च विशुद्धिसमुदागमकारणैश्चतुर्भिरनुगता[9] धर्मराजपुत्रा भवन्ति तथागतकुले । कथमिति ।

बीजं येषामग्रयानाधिमुक्ति-
र्माता प्रज्ञा बुद्धधर्मप्रसूत्यै ।

1. One would expect °*patitāś ceha*°, but neither B nor T have *ca.*

2. *niyatasattva*°, B, but cf. the other two sentences.

3. B om. *ri.*

4. B om. *vi,* but T and C rightly have it.

5. *tadubhayābhi*°, B.

6. B om. *nā.*

7. B later on reads *anyatīrthya,* not *anyatīrtha* as here.

8. T adds *dharmān* (*chos*) after °*ādīn,* but this is not necessary and is not in C.

9. B adds *dharmakāya* before *dharmarāja* against C and T.

गर्भस्थानं ध्यानसौख्यं कृपोक्ता
धात्री पुत्रास्तेऽनुजाता मुनीनाम् ॥ ३४ ॥

तत्र फलार्थ कर्मार्थं[1] चारभ्य श्लोकः ।

शुभा(17b)त्मसुखनित्यत्वगुणपारमिता फलम् ।
दुःखनिर्विच्छमप्राप्तिच्छन्दप्रणिधिकर्मकः[2] ॥ ३५ ॥

तत्र पूर्वेण श्लोकार्धेन किं दर्शितम् ।

फलमेषां समासेन धर्मकाये विपर्ययात् ।
चतुर्विधविपर्यासप्रतिपक्षप्रभावितम् ॥ ३६ ॥

य एतेऽधिमुक्त्यादयश्चत्वारो धर्मास्तथागतधातोर्विशुद्धिहेतव एषां यथासंख्यमेव समासतश्चतुर्विधविपर्यासविपर्ययप्रतिपक्षेण चतुराकारा तथागतधर्मकायगुणपारमिता फलं द्रष्टव्यम् । तत्र या रूपादिके वस्तुन्यनित्ये नित्यमिति संज्ञा । दुःखे सुखमिति । अनात्मन्यात्मेति । अशुभे शुभमिति संज्ञा । अयमुच्यते चतुर्विधो विपर्यासः । एतद्विपर्ययेण चतुर्विध एवाविपर्यासो वेदितव्यः । कतमश्चतुर्विधः । या तस्मिन्नेव रूपादिके वस्तुन्यनित्यसंज्ञा । दुःखसंज्ञा । अनात्मसंज्ञा । अशुभसंज्ञा । अयमुच्यते चतुर्विधविपर्यासविपर्ययः । स खल्वेष नित्यादिलक्षणं तथागतधर्मकायमधिकृत्येह विपर्यासोऽभिप्रेतो यस्य प्रतिपक्षेण[3] चतुराकारा तथागतधर्मकायगुणपारमिता व्यवस्थापिता[4] । तद्यथा नित्यपारमिता सुखपारमितात्मपारमिता शुभपारमितेति । एष च ग्रन्थो विस्तरेण यथासूत्रमनुगन्तव्यः[5] । विपर्यस्ता भगवन् सत्त्वा उपात्तेषु पञ्चसूपादानस्कन्धेषु । ते भवन्त्यनित्ये नित्यसंज्ञिनः । दुःखे सुखसंज्ञिनः । अनात्मन्यात्मसंज्ञिनः । अशुभे शुभसं(18a)ज्ञिनः। सर्वश्रावकप्रत्येकबुद्धा अपि भगवन् शून्यताज्ञानेनादृष्टपूर्वे सर्वज्ञज्ञानविषये तथा-

1. B om. *karmārthaṁ*, which is required and is given by C and T.
2. °*dharmakaḥ*, corrected on margin to °*karmakaḥ*, B; C and T as in text.
3. *pratikṣepeṇa*, B; C and T as in text.
4. °*sthāpitāḥ*, B.
5. From the *Āryaśrīmālāsūtra*.



गतधर्मकाये विपर्यस्ताः । ये[1] भगवन् सत्त्वाः स्युर्भगवतः पुत्रा औरसा नित्यसंज्ञिन आत्मसंज्ञिनः सुखसंज्ञिनः शुभसंज्ञिनस्ते भगवन् सत्त्वाः स्युरविपर्यस्ताः[2] । स्युस्ते भगवन् सम्यग्दर्शिनः । तत् कस्माद्धेतोः । तथागतधर्मकाय एव भगवन् नित्यपारमिता सुखपारमिता आत्मपारमिता शुभपारमिता । ये भगवन् सत्त्वास्तथागतधर्मकायमेवं पश्यन्ति ते सम्यक् पश्यन्ति[3] । ये सम्यक पश्यन्ति ते[4] भगवतः पुत्रा औरसा इति विस्तरः ।

आसां पुनश्चतसृणां तथागतधर्मकायगुणपारमितानां हेत्वानुपूर्व्या[5] प्रतिलोमक्रमो वेदितव्यः । तत्र महायानधर्मप्रतिहतानामिच्छन्तिकानामशुचिसंसाराभिरतिविपर्ययेण बोधिसत्त्वानां महायानधर्माधिमुक्तिभावनायाः शुभपारमिताधिगमः फलं द्रष्टव्यम् । पञ्चसूपादानस्कन्धेष्वात्मदर्शिनामन्यतीर्थ्यानामसदात्मग्रहा[6]भिरतिविपर्ययेण प्रज्ञापारमिताभावनायाः परमात्मपारमिताधिगमः फलं द्रष्टव्यम् । सर्वे ह्यन्यतीर्थ्या रूपादिकमतत्स्वभावं वस्त्वात्मेत्युपगताः[7] । तच्चैषां वस्तु यथाग्रहमात्मलक्षणेन विसंवादित्वात् सर्वकालमनात्मा । तथागतः (18b) पुनर्यथाभूतज्ञानेन सर्वधर्मनैरात्म्यपरपा(IXa)रमभिप्राप्तः[8] । तच्चास्य नैरात्म्यमनात्मलक्षणेन यथादर्शनमविसंवादित्वात् सर्वकालमात्माभिप्रेतो नैरात्म्यमेवात्मनि कृत्वा । यथोक्तं स्थितोऽस्थानयोगेनेति[9] । संसारदुःखभीरूणां श्रावक-

1. In B the words *viparyastāḥ ye* are very faint and may be meant to be erased. The first occurs in T, which has *de daṅ* (*te ca*) for *ye*; this is apparently a mistake for *gaṅ* (*ye*), which O evidently read.
2. *syur viparyastāḥ*, B; T and C as in text.
3. B om. *te samyak paśyanti* against C and T.
4. T had *te sarve* (*de-dag thams-cad*).
5. *hetvanu*°, B.
6. Should one read *ātmagrāha* here and *yathāgrāham* below?
7. *upagatā*, B.
8. *Tathāgatavastu*... °*prāptaṁ*, B; T and C as in text; A has °*prāptaṁ*, which suggests that it too read *vastu*, but this reading seems to me inferior in sense.
9. °*yogenayati*, B. O misunderstands this sentence, which means that the paradox of treating *nairātmya* as *ātman* is parallel to the opposition between *sthita* and *asthāna* in the phrase quoted. This quotation, not necessarily from a sūtra and missing in C, has not been traced. C adds a verse with commentary to explain this view of *ātman*, and there is possibly a lacuna in the Sanskrit text.

यानिकानां संसारदुःखोपशममात्राभिरतिविपर्ययेण गगनगञ्जादिसमाधिभावनायाः सर्वलौकिकलोकोत्तरसुखपारमिताधिगमः फलं द्रष्टव्यम् । सत्त्वार्थनिरपेक्षाणां प्रत्येकबुद्धयानीयानामसंसर्गविहाराभिरतिविपर्ययेण महाकरुणाभावनायाः सततसमितमा संसारात् सत्त्वार्थफलिगोध[1]परिशुद्धत्वान् नित्यपारमिताधिगमः फलं द्रष्टव्यम् । इत्येतासां चतसृणामधिमुक्तिप्रज्ञासमाधिकरुणाभावनानां यथासंख्यमेव चतुराकारं[2] तथागतधर्मकाये शुभात्मसुखनित्यत्वगुणपारमिताख्यं फलं निर्वर्त्यते[3] बोधिसत्त्वानाम् । आभिश्च तथागतो धर्मधातुपरम आकाशधातुपर्यवसानोऽपरान्तकोटिनिष्ठ इत्युच्यते । महायानपरमधर्माधि[4]मुक्तिभावनया हि तथागतोऽत्यन्तशुभधर्मधातुपरमताधिगमाद्धर्मधातुपरमः संवृत्तः । प्रज्ञापारमिताभावनयाकाशोपमसत्त्वभाजनलोकनैरा(19*a*)त्म्यनिष्ठागमनाद् गगनगञ्जादिसमाधिभावनया च सर्वत्र परमधर्मैश्वर्यविभुत्वसंदर्शनादाकाशधातुपर्यवसानः । महाकरुणाभावनया सर्वसत्त्वेष्वपर्यन्तकालकारुणिकतामुपादायापरान्तकोटिनिष्ठ इति ।

आसां पुनश्चतसृणां[5] तथागतधर्मकायगुणपारमितानामधिगमायानास्रवधातुस्थितानामप्यर्हतां प्रत्येकबुद्धानां वशिताप्राप्तानां च बोधिसत्त्वानामिमे चत्वारः परिपन्था भवन्ति । तद्यथा प्रत्ययलक्षणं हेतुलक्षणं संभवलक्षणं विभवलक्षणमिति । तत्र प्रत्ययलक्षगमविद्यावासभूमिरविद्येव संस्काराणाम् । हेतुलक्षणमविद्यावासभू[6]मिप्रत्ययमेव संस्कारवद[7]नास्रवं कर्म । संभवलक्षणमविद्यावासभूमिप्रत्ययानास्रवकर्महेतुकी च त्रिविधा[8] मनोमयात्मभावनिर्वृत्तिश्चतु[9]-

1. So A; *pariśodha* (for *parigodha?*), B; *yoṅs-su spyod-pa*, T. C does not translate the word. Its form is quite uncertain in the texts, and its meaning far from clear.
2. °*ākāre*, B.
3. *nirvattate*, B
4. B om. *dharma*.
5. T had *caturvidhānāṁ* (*rnam-par bzhi*).
6. °*vāsanābhūmi*°, B. The *Laṅkāvatārasūtra*, p. 220, line 14, has *avidyāvāsanabhūmi*.
7. C read either *saṁskārā iva vijñānasya* or *saṁskārapratyayam iva vijñānam*; the second perhaps is a better reading.
8. *tridhā*, A.
9. *nivṛtti catur*°, B.



रुपादानप्रत्यया सास्रवकर्महेतुकीव त्रिभवाभिनिर्वृत्तिः[1] । विभवलक्षणं त्रिविधमनोमयात्मभावनिर्वृत्ति[2]प्रत्यया जातिप्रत्ययमिव जरामरणमचिन्त्या पारिणामिकी[3] च्युतिरिति ।

तत्र सर्वोपक्लेशसंनिश्रयभूताया अविद्यावासभूमेर[4]प्रहीणत्वादर्हन्तः प्रत्येकबुद्धा वशिताप्राप्ताश्च बोधिसत्त्वाः सर्वक्लेशमलदौर्गन्ध्यवासनापकर्ष[5]पर्यन्तशुभपारमितां नाधिगच्छन्ति । तामेव चावि(19*b*)द्यावासभूमिं प्रतीत्य सूक्ष्मनिमित्तप्रपञ्चसमुदाचारयोगादत्यन्तमनभिसंस्कार[6]मात्मपारमितां नाधिगच्छन्ति । तां चाविद्यावासभूमिमविद्यावासभूमिप्रत्ययं च[7] सूक्ष्मनिमित्तप्रपञ्चसमुदाचारसमुत्थापितमनास्रवं कर्म प्रतीत्य मनोमयस्कन्धसमुदयात् तन्निरोधमत्यन्तसुखपारमितां नाधिगच्छन्ति । यावच्च निरवशेषक्लेशकर्मजन्मसंक्लेशनिरोधसमुद्भूतं तथागतधातुं न साक्षात्कुर्वन्ति तावदचिन्त्यपारिणामिक्याश्च्यु(IX*b*)तेरविगमाद[8]त्यन्तानन्यथाभावां नित्यपारमितां नाधिगच्छन्ति । तत्र क्लेशसंक्लेशवदविद्यावासभूमिः । कर्मसंक्लेशवदनास्रवकर्माभिसंस्कारः । जन्मसंक्लेशवत् त्रिविधा मनोमयात्मभावनिर्वृत्तिरचिन्त्यपारिणामिकी च[9] च्युतिरिति ।

एष च[10] ग्रन्थो विस्तरेण यथासूत्रमनुगन्तव्यः । स्याद्यथापि नाम भगवन्नुपादानप्रत्ययाः सास्रवकर्महेतुकास्त्रयो भवाः संभवन्ति । एवमेव भगवन्नविद्या-

1. A om. *tri*, which B and T have.
2. °*nivṛtti*°, B.
3. *pariṇāmikī*, B.
4. *bhūmir*, B
5. Text as in A; °*vāsanāprakarṣa*°, B, which does not make sense; T seems to have read °*vāsanāyogāt* (*bag-chags . . . . daṅ ldan-paḥi phyir*), which would bring the sentence into the same form as the following ones. C paraphrases and throws no light on the original it had.
6. *anabhisaṁskāram*, read by A and B, is difficult and has to be understood either as an adverb or a gerund in *-am*. C seems to have had *asaṁskṛtām* or *anabhisaṁskṛtām*, and T may have had the same. Possibly one should read °*saṁskārām*.
7. *bhūmiñ ca pratyayañ ca*, B.
8. *anapagamād*, B.
9. B om. *ca*, which is added above the line in A.
10. B om. *ca*. Quotation from the *Āryaśrīmālāsūtra*.

वासभूमिप्रत्यया अनास्रवकर्महेतुका अर्हतां प्रत्येकबुद्धानां वशिताप्राप्तानां च बोधिसत्त्वानां मनोमयास्त्रयः कायाः संभवन्ति । आसु भगवन् तिसृषु भूमिष्वेषां त्रयाणां मनोमयानां कायानां[1] संभवायानास्रवस्य च कर्मणोऽभिनिर्वृत्तये प्रत्ययो भव(20*a*)त्यविद्यावासभूमिरिति विस्तरः । यत एतेषु त्रिषु मनोमयेष्वर्हत्प्रत्येकबुद्धबोधिसत्त्वकायेषु शुभात्मसुखनित्यत्वगुणपारमिता न संविद्यन्ते तस्मात् तथागतधर्मकाय एव नित्यपारमिता सुखपारमितात्मपारमिता शुभपारमितेत्युक्तम् ।

स हि प्रकृतिशुद्धत्वाद्वासनापगमाच्छुचिः
परमात्मात्मनैरात्म्यप्रपञ्चक्षयशान्तितः ॥ ३७ ॥
सुखो मनोमयस्कन्धतद्धेतुविनिवृत्तितः ।
नित्यः संसारनिर्वाणसमताप्रतिवेधतः[2] ॥ ३८ ॥

समासतो द्वाभ्यां कारणाभ्यां तथागतधर्मकाये शुभपारमिता वेदितव्या । प्रकृतिपरिशुद्ध्या सामान्यलक्षणेन । वैमल्यपरिशुद्ध्या विशेषलक्षणेन । द्वाभ्यां कारणाभ्यामात्मपारमिता वेदितव्या । तीर्थिकान्तविवर्जनतया चात्मप्रपञ्चविगमाच्छ्रावकान्तविवर्जनतया च नैरात्म्यप्रपञ्चविगमात् । द्वाभ्यां कारणाभ्यां सुखपारमिता वेदितव्या । सर्वाकारदुःखसमुदयप्रहाणतश्च वासनानुसंधिसमुद्घातात् सर्वाकारदुःखनिरोधसाक्षात्करणतश्च मनोमयस्कन्ध[3]निरोधसाक्षात्करणात् । द्वाभ्यां कारणाभ्यां नित्यपारमिता वेदितव्या । अनित्यसंसारानपकर्षणत[4]श्चोच्छेदान्ता[5]पतनान् नित्यनिर्वाणसमारोपणतश्च शाश्वतान्तापतनात् । यथोक्तम्[6] । अनित्याः सं(20*b*)स्कारा इति चेद् भगवन् पश्येत सास्य स्यादु-

1. A om. *kāyānāṁ*, which B and T have.
2. C treats these two verses as prose.
3. T read *ātmabhāva* (*lus*) for *skandha*, and so also apparently C ('birth-bodies').
4. A read *saṁsārānupakarṣaṇa*; T translates *ḥbrid-pas*, to which S. C. Das, *Tibetan Dict.*, attributes the meaning 'impose' (i.e. *upakarṣaṇa*), but which O renders 'suppress' (i.e. *apakarṣaṇa*). B and C as in text.
5. *cocchedāpatanāt*, B
6. From the *Āryaśrīmālāsūtra*.



च्छेददृष्टिः । सास्य[1] स्यान्न सम्यग्दृष्टिः । नित्यं निर्वाणमिति चेद् भगवन् पश्येत सास्य स्याच्छाश्वतदृष्टिः । सास्य स्यान्न सम्यग्दृष्टिरिति ।

तदनेन धर्मधातुनयमुखेन परमार्थतः संसार एव निर्वाणमित्युक्तम् । उभयथाविकल्पनाप्रतिष्ठितनिर्वाणसाक्षात्करणतः[2] । अपि खलु द्वाभ्यां कारणाभ्यामविशेषेण सर्वसत्त्वानामासन्नदूरीभावविगमादप्रतिष्ठितपदप्राप्तिमात्रपरिदीपना[3] भवति । कतमाभ्यां द्वाभ्याम् । इह बोधिसत्त्वोऽविशेषेण सर्वसत्त्वानां नासन्नीभवति[4] प्रज्ञयाशेषतृष्णानुशयप्रहाणात्[5] । न दूरीभवति महाकरुणया तदपरित्यागादिति[6] । अयमुपायोऽप्रतिष्ठितस्वभावायाः सम्यक्संबोधेरनुप्राप्तये । प्रज्ञया हि बोधिसत्त्वोऽशेषतृष्णानुशयप्रहाणादात्महिताय निर्वाणगताध्याशयः[7] संसारे न प्रतिष्ठतेऽपरिनिर्वाणगोत्रवत् । महाकरुणया दुःखितसत्त्वा[8]परित्यागात् परहिताय संसारगतप्रयोगो निर्वाणे न प्रतिष्ठते शमैकयानगोत्रवत् । एवमिदं धर्मद्वयमनुत्तराया बोधेर्मूलं प्रतिष्ठानमिति ।

छित्त्वा स्नेहं प्रज्ञयात्मन्यशेषं
सत्त्वस्नेहान् नैति शान्तिं कृपावान् ।
निःश्रित्यैवं धीकृपे बोध्युपायौ
नोपैत्यार्यः संवृतिं निर्वृतिं वा ॥ ३९ ॥

तत्र पूर्वाधिकृ(21*a*)तं[9] कर्मार्थमारभ्य परेण श्लोकार्धेन किं दर्शितम् ।

बुद्धधातुः सचेन्न स्यान्निर्विद्दुःखेऽपि नो भवेत् ।
नेच्छा न प्रार्थना नापि प्रणिधिर्निर्वृतौ भवेत् ॥ ४० ॥

1. *sasya*, B.
2. C adds a gāthā here, and then omits everything up to the introductory sentence to verse 40.
3. °*parīdīpanā*, A.
4. B om. the negative.
5. °*ānuśaṁsayaprahāṇāt*, B; *bag-la ñal*, T.
6. *tad api parityāgād*, B.
7. A's f. ix ends here with *nirvāṇa*. B om. *nirvāṇagatādhyā*°, leaving a gap.
8. B repeats *sattva*.
9. B om. *taṁ*.

तथा चोक्तम् । तथागतगर्भश्चे[1]द् भगवन्न स्यान्न स्याद्दुःखेऽपि निर्विन्न निर्वाण इच्छा वा प्रार्थना वा प्रणिधिर्वेति[2] । तत्र समासतो बुद्धधातुविशुद्धिगोत्रं[3] मिथ्यात्वनियतानामपि सत्त्वानां द्विविध[4]कार्यप्रत्युपस्थापनं भवति । संसारे च दुःखदोषदर्शननिःश्रयेण निर्विदमुत्पादयति । निर्वाणे सुखानुशंसदर्शननिःश्रयेण च्छन्दं जनयति । इच्छां प्रार्थनां प्रणिधिमिति । इच्छाभिलषितार्थप्राप्तावसंकोचः । प्रार्थनाभिलषितार्थप्राप्त्युपायपरिमार्गणा । प्रणिधिर्याभिलषितार्थे चेतना चित्ताभिसंस्कारः[5] ।

भवनिर्वाणतद्दुःखसुखदोषगुणेक्षणम् ।
गोत्रे सति भवत्येतदगोत्राणां न विद्यते ॥ ४१ ॥

यदपि तत् संसारे च दुःखदोषदर्शनं भवति निर्वाणे च सुखानुशंसदर्शनमेतदपि शुक्लांशस्य[6] पुद्गलस्य गोत्रे सति भवति नाहेतुकं नाप्रत्ययमिति । यदि हि तद्गोत्रमन्तरेण[7] स्यादहेतुकमप्रत्ययं पापसमुच्छेदयोगेन[8] तदिच्छान्तिकानामप्यपरिनिर्वाणगोत्राणां स्यात् । न च भवति तावद्यावदागन्तुकमलविशुद्धिगोत्रं त्रयाणामन्यतमधर्मा[9]धिमुक्तिं न स(21*b*)मुदानयति सत्पुरुषसंसर्गादिचतुःशुक्लसमवधानयोगेन ।

यत्र ह्याह[10] । तत्र पश्चादन्तशो मिथ्यात्वनियतसंतानानामपि सत्त्वानां कायेषु[11] तथागतसूर्यमण्डलरश्मयो निपतन्ति * * * [12]अनागतहेतुसंजन-

1. *Tathāgarbhas*, B. Quotation from the *Āryaśrīmālāsūtra*.
2. e.c.; *nirvin nirvāṇecchā prārthanā va praṇi*(gap)*ti*, B; *mya-ṅan-las ḥdas-pa-la ḥdod-pa daṅ ḥdun-pa daṅ don-du gñer-pa smon-pa yaṅ med-par ḥgyur-ro zhes* (text, adding *chando vā*, which C omits), T.
3. °*dhātuḥ* (or *r*) *viśuddhi*°, B; T ambiguous.
4. *dvividhaṁ*, B; T as in text.
5. T om. either *cetanā* or *citta*; but C shows both.
6. *śuklasasya*, B; *dkar-po cha daṅ ldan-paḥi*, T.
7. T om. *gotram antareṇa*, but C apparently had it.
8. *ahetutvapratyayaṁ*, B; *rgyu-med rkyen med-par sdig-pa mi zad-pa daṅ ldan-paḥi tshul-gyis* (..*pāpāsamucchedayogena*), T.
9. *Dharma* here stands for Vehicle.
10. C attributes the quotation to the *Avataṁsakasūtra*, O to the *Jñānālokālaṁkārasūtra*.
11. e.c.; *kāyena*, B (much rubbed and not clear); *lus-la*, T.
12. C and T agree that a phrase is missing in B here, meaning 'and they cause benefit (*hita*)'.



नतया संवर्धयन्ति च कुशलैर्धर्मैरिति । यत्पुनरिदमुक्तमिच्छन्तिकोऽत्यन्तमपरिनिर्वाणधर्मेति तन् महायानधर्मप्रतिघ इच्छन्तिकत्वे हेतुरिति महायानधर्मप्रतिघनिवर्तनार्थमुक्तं कालान्तराभिप्रायेण । न खलु कश्चित्प्रकृतिविशुद्धगोत्रसंभवादत्यन्ताविशुद्धिधर्मा[1] भवितुमर्हति । यस्मादविशेषेण[2] पुनर्भगवता सर्वसत्त्वेषु विशुद्धिभव्यतां[3] संधायोक्तम् ।

अनादिभूतोऽपि हि चावसानिकः
स्वभावशुद्धो ध्रुवधर्मसंहितः[4] ।
अनादिकोशैर्बहिर्वृतो न दृश्यते[5]
सुवर्णबिम्बं परिच्छादितं[6] यथा ॥

तत्र योगार्थमारभ्य श्लोकः ।

महोदधिरिवामेयगुणरत्नाक्षयाकरः ।
प्रदीपवदनिर्भागगुणयुक्तस्वभावतः ॥ ४२ ॥

तत्र पूर्वेण श्लोकार्धेन किं दर्शितम्[7] ।

धर्मकायजिनज्ञानकरुणाधातुसंग्रहात् ।
पात्ररत्नाम्बुभिः साम्यमुदधेरस्य दर्शितम् ॥ ४३ ॥

त्रयाणां स्थानानां यथासंख्यमेव त्रिविधेन महासमुद्रसाधर्म्येण तथागतधातोर्हेतुसमन्वागममधिकृत्य योगार्थो वेदितव्यः । कतमानि त्रीणि स्थानानि । तद्यथा धर्मकायविशुद्धिहेतुः[8] । बुद्धज्ञानसमु(22*a*)दागमहेतुः । तथागतमहाकरुणा-

1. T om. *dharma*.
2. *aviśeṣaṇa*, B.
3. °*bhavyatī*, B. C omits this sentence and the following verse.
4. °*śuddho hi dharma*°, B; *rtag-paḥi chos-can*, T. The verse is attributed by O to the *Āryaśrīmālāsūtra*.
5. e.c.; *anādikośai bahi vṛdo na dṛśyante* (?), B; *thog-med ñon-moṅs-kyis phyi bsgribs mi mthoṅ* (*anādikleśair bahir vṛto na dṛśyate*), T. °*kośair* is better metrically and to suit the simile; *bahir vṛto* is a syllable in excess. C omits the verse
6. *paricchāditaṁ* is unmetrical.
7. *darśita*, B.
8. *dharmakāviśuddhi*°, B; T om. *kāya*, but C has it.

वृत्तिहेतुरिति[1] । तत्र धर्मकायविशुद्धिहेतुर्महायानाधिमुक्तिभावना द्रष्टव्या । बुद्धज्ञानसमुदा[2]गमहेतुः प्रज्ञासमाधिमुखभावना । तथागतमहाकरुणाप्रवृत्ति[3]हेतुर्बोधिसत्त्वकरुणाभावनेति । तत्र महायानाधिमुक्ति[4]भावनाया भाजनसाधर्म्यं तस्यामपरिमेयाक्षयप्रज्ञासमाधिरत्नकरुणावारिसमवसरणात् । प्रज्ञासमाधिमुखभावनाया रत्नसाधर्म्यं तस्या निर्विकल्पत्वादचिन्त्यप्रभावगुणयोगाच्च । बोधिसत्त्वकरुणाभावनाया वारिसाधर्म्यं तस्याः सर्वजगति परमस्निग्धभावैकरसलक्षणप्रयोगादिति[5] । एषां त्रयाणां धर्माणामनेन त्रिविधेन हेतुना तत्संबद्धः समन्वागमो योग इत्युच्यते ।

तत्रापरेण श्लोकार्धेन किं दर्शयति ।

अभिज्ञाज्ञानवैमल्यतथताव्यतिरेकतः ।
दीपालोकोष्णवर्णस्य साधर्म्यं विमलाश्रये[6] ॥ ४४ ॥

त्रयाणां स्थानानां यथासंख्यमेव त्रिविधेन दीपसाधर्म्येण तथागतधातोः फलसमन्वागममधिकृत्य योगार्थो वेदितव्यः । कतमानि त्रीणि स्थानानि । तद्यथा । अभिज्ञा आस्रवक्षयज्ञानमास्रवक्षयश्चेति । तत्र पञ्चानामभिज्ञानां ज्वालासाधर्म्यं तासामर्थानुभवज्ञान[7]विपक्षान्धकारविधमनप्रत्युपस्थानलक्षणत्वात् । आस्रवक्षयज्ञानस्योष्णसाधर्म्यं तस्य निरव(22*b*)शेषकर्मक्लेशेन्धनदहनप्रत्युपस्थानलक्षणत्वात् । आश्रयपरिवृत्तेरास्रवक्षयस्य वर्णसाधर्म्यं तस्यात्यन्तविमलविशुद्ध-

1. C seems to have read *karuṇāprāptihetur.*
2. B repeats the characters *mudā.*
3. T does not show *pra* in *pravṛtti,* and has *bodhisattvamahākaruṇā.*
4. T reads *mahāyānadharmādhimukti.*
5. T om. *lakṣaṇapra*; C either as in text or reading °*lakṣaṇayogād,* which is perhaps preferable.
6. B reads *abhijñāvaimalyatathatādivyatirekataḥ / dīpāloṣṇatāvavarṇṇasya dharmamālāśraye.* T has *dri-med gnas-la mṅon-śes daṅ / ye-śes dri-med de-gñis (for ñid) daṅ / rnam-dbye med-phyir mar-me-yi / sna* (for *snaṅ*) *daṅ dro mchog chos-mtshuṅs-can.* C as in text, omitting *jñāna*; like T, it divides *tathatā-avyatirekataḥ.*
7. T om. *jñāna,* but C as in text. B adds here, *viśuddhaprabhāsvaralakṣaṇatvāt / tatra vimalakleśāvaraṇaprahāṇāt / viśuddho jñānāvaraṇaprahāṇāt,* which recur lower down and do not belong here.



प्रभास्वरलक्षणत्वात् । तत्र विमलः[1] क्लेशावरणप्रहाणात् । विशुद्धो ज्ञेयावरणप्रहाणात् । प्रभास्वरस्तद्[2]भयागन्तुकताप्रकृतितः । इत्येषां समासतः सप्तानामभिज्ञाज्ञानप्रहाणसंगृहीतानामशैक्षसान्तानिकानां धर्माणामनास्रवधातावन्योन्यमविनिर्भागत्वमपृथग्भावो धर्मधातुसमन्वागमो योग इत्युच्यते । एष च योगार्थमारभ्य प्रदीप[3]दृष्टान्तो विस्तरेण यथासूत्रमनुगन्तव्यः[4] । तद्यथा शारिपुत्र प्रदीपः । अविनिर्भागधर्मा । अविनिर्मुक्तगुणः । यदुत[5] आलोकोष्ण[6]वर्णताभिः । मणिर्वालोकवर्णसंस्थानैः । एवमेव शारिपुत्र तथागतनिर्दिष्टो धर्मकायोऽविनिर्भागधर्माविनिर्मुक्तज्ञानगुणो यदुत गङ्गानदीवालिकाव्यतिवृत्तैस्तथागतधर्मैरिति ।

तत्र वृत्त्यर्थमारभ्य श्लोकः ।

पृथग्जनार्यसंबुद्धतथताव्यतिरेकतः ।
सत्त्वेषु जिगर्भो[7]ऽयं देशितस्तत्त्वदर्शिभिः ॥ ४५ ॥

अनेन किं दर्शितम् ।

पृथग्जना विपर्यस्ता दृष्टसत्या विपर्ययात् ।
यथावदविपर्यस्ता निष्प्रपञ्चास्तथागताः ॥ ४६ ॥

यदिदं तथागतधातोः सर्वधर्मतथताविशुद्धिसामान्यलक्षणमुपदिष्टं **प्रज्ञापारमिता**दि(23*a*)षु निर्विकल्पज्ञानमुखाववादमारभ्य बोधिसत्त्वानामस्मिन् समासतस्त्रयाणां पुद्गलानां पृथग्जनस्यातत्त्वदर्शिन आर्यस्य तत्त्वदर्शिनो[8] विशुद्धिनिष्ठागतस्य तथागतस्य[9] त्रिधा भिन्ना प्रवृत्तिर्वेदितव्या[10] । यदुत विपर्यस्ता-

1. *vimala,* B.
2. *prabhāsvara tad°,* B.
3. T om. *pradīpa* and adds *uktam* after sentence. C omits the whole para.
4. C omits this quotation and O does not identify it; probably it comes from the *Anūnatvāpūrṇatvanirdeśaparivarta.*
5. T om. *yad uta.*
6. B om. *ṣṇa*; *snaṅ-ba daṅ dro-ba daṅ mdog-dag-gis,* T
7. e.c.; *jayagarbho,* B; *rgyal-baḥi sñiṅ-po,* T; 'Tathāgatagarbha', C.
8. *pudgalānām atatvadarśi* (*pṛthagjanasyatatvadarśi,* added on margin in second hand) *na āryasya tatvadarśina,* B.
9. B om. first *ta* in *Tathāgatasya.*
10. *pravṛtir,* B.

विपर्यस्ता सम्यगविपर्यस्ता[1] निष्प्रपञ्चा च यथाक्रमम् । तत्र विपर्यस्ता संज्ञाचित्तदृष्टिविपर्यासाद् बालानाम् । अविपर्यस्ता विपर्ययेण तत्प्रहाणादार्याणाम्[2] । सम्यगविपर्यस्ता निष्प्रपञ्चा च सवासनक्लेशज्ञेयावरणसमुद्घातात् सम्यक्संबुद्धानाम् ।

अतः परमेतमेव[3] वृत्त्यर्थमारभ्य तदन्ये चत्वारोऽर्थाः प्रभेदनिर्देशादेव[4] वेदितव्याः । तत्रैषां त्रयाणां पुद्गलानामवस्थाप्रभेदार्थमारभ्य श्लोकः ।

अशुद्धोऽशुद्धशुद्धोऽथ[5] सुविशुद्धो यथाक्रमम् ।
सत्त्वधातुरिति प्रोक्तो बोधिसत्त्वस्तथागतः ॥ ४७ ॥

अनेन किं दर्शितम् ।

स्वभावादिभिरित्येभिः षड्भि[6]रर्थैः समासतः ।
धातुस्तिसृष्ववस्थासु विदितो नामभिस्त्रिभिः ॥ ४८ ॥

इति ये केचिदनास्रवधातुनिर्देशा नानाधर्मपर्यायमुखेषु भगवता विस्तरेण निर्दिष्टाः सर्वे त[7] एभिरेव समासतः षड्भिः[8] स्वभावहेतुफलकर्मयोगवृत्त्यर्थैः संगृहीतास्तिसृष्ववस्थासु यथाक्रमं त्रिनामनिर्देशतो निर्दिष्टा वेदितव्याः । यदुताशुद्धावस्थायां सत्त्वधातुरिति । अशुद्धशुद्धावस्थायां बोधिसत्त्व इति[9] । (23*b*) सुविशुद्धावस्थायां तथागत इति । यथोक्तं भगवता[10] । अयमेव शारिपुत्र धर्मकायोऽपर्यन्तक्लेशकोशकोटिगूढः । संसारस्रोतसा उह्यमानोऽनवराग्रसंसारगतिच्युत्युपपत्तिषु संचरन् सत्त्वधातुरित्युच्यते । स एव शारिपुत्र धर्मकायः संसारस्रोतोदुःखनिर्विण्णो विरक्तः सर्वकामविषयेभ्यो दशपारमितान्तर्गतैश्चतुरशीत्या

1. *samyagviparyastā*, B; T and C as in text.
2. *ācāryāṇām*, B; T and C as in text.
3. T om. *etam eva*.
4. °*nirdeśād veva* B.
5. e.c.; B om. *'tha*; *daṅ*, T.
6. *ṣadbhir*, B.
7. *te*, B.
8. *ṣadbhiḥ*, B.
9. B repeats *śuddhāvasthāyām bodhisatva iti*.
10. From the *Anūnatvāpūrṇatvanirdeśaparivarta* (C).



धर्मस्कन्धसहस्रैर्बोधाय[1] चर्यां चरन् बोधिसत्त्व इत्युच्यते । स एव पुनः शारिपुत्र धर्मकायः सर्वक्लेशकोशपरिमुक्तः सर्वदुःखातिक्रान्तः सर्वोपक्लेशमलापगतः शुद्धो विशुद्धः परमपरिशुद्धधर्मतायां स्थितः सर्वसत्त्वालोकनीयां भूमिमारूढः सर्वस्यां ज्ञेयभूमावद्वितीयं पौरुषं स्थाम प्राप्तोऽनावरणधर्माप्रतिहतसर्वधर्मैश्वर्यबलतामधिगतस्तथागतोऽर्हन् सम्यक्संबुद्ध इत्युच्यते ।

[2]तास्वेव तिसृष्ववस्थासु तथागतधातोः सर्वत्रगार्थमारभ्य श्लोकः ।

सर्वत्रानुगतं यद्वन्निर्विकल्पात्मकं नभः ।
चित्तप्रकृतिवैमल्यधातुः सर्वत्रगस्तथा ॥ ४९ ॥

अनेन किं दर्शितम् ।

तद्दोषगुणनिष्ठासु व्यापि सामान्यलक्षणम् ।
हीनमध्यविशिष्टेषु व्योम रूपगतेष्विव ॥ ५० ॥

यासौ पृथग्जनार्य[3]संबुद्धानामविकल्पचित्तप्रकृतिः (24*a*)सा तिसृष्ववस्थासु यथाक्रमं दोषेष्वपि गुणेष्वपि गुणविशुद्धिनिष्ठायामपि सामान्यलक्षणत्वादाकाशमिव मृद्रजतसुवर्णभाजनेष्वनुगतानुप्रविष्टा समा निर्विशिष्टा प्राप्ता सर्वकालम्[4] । अत एवावस्थानिर्देशानन्तरमाह[5] । तस्माच्छारिपुत्र नान्यः सत्त्वधातुर्नान्यो धर्मकायः । सत्त्वधातुरेव धर्मकायः । धर्मकाय एव सत्त्वधातुः । अद्वयमेतदर्थेन । व्यञ्जनमात्रभेद इति[6] ।

एतास्वेव तिसृष्ववस्थासु तथागतधातोः सर्वत्रगस्यापि तत्संक्लेशव्यवदानाभ्यामविकारार्थ[7]मारभ्य चतुर्दश श्लोकाः । अयं च तेषां पिण्डार्थो वेदितव्यः ।

दोषागन्तुकतायोगाद् गुणप्रकृतियोगतः ।
यथा पूर्वं तथा पश्चादविकारित्वधर्मता ॥ ५१ ॥

1. *bodhādhāya*, B.
2. B has *iti* at beginning, which T omits.
3. *pṛthagjanasyārya*°, B.
4. *sasarvakālaṁ*, B.
5. °*nirdeśāntaram*, B; T as in text. From the *Anūnatvāpūrṇatvanirdeśaparivarta* (C).
6. e. c. ; *vyañjanamātran nāpati* (for *nāmeti* ? ), B; *yi-ge tsam daṅ tha-dad-pa yin-no zhes*, T; 'different in name', C.
7. *adhikārārtham*, B; C and T as in text.

द्वादशभिरेकेन . च श्लोकेन यथाक्रममशुद्धावस्थायाम[1]शुद्धशुद्धावस्थायां च क्लेशोपक्लेशदोषयोरा[2]गन्तुकयोगाच्चतुर्दशमेन श्लोकेन सुविशुद्धावस्थायां गङ्गानदीवालुकाव्यतिवृत्तैरविनिर्भागैरमुक्तज्ञैरचिन्त्यैर्बुद्धगुणैः[3] प्रकृतियोगादाकाशधातोरिव पौर्वापर्येण तथागतधातोरत्यन्ताविकार[4]धर्मता परिदीपिता । तत्राशुद्धावस्थायामविकारार्थ[5]मारभ्य कतमे द्वादश श्लोकाः ।

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थि (24*b*) तः सत्त्वे[6] तथायं नोपलिप्यते ।।५२।।
यथा सर्वत्र लोकानामाकाश उदयव्ययः ।
तथैवासंस्कृते धाताविन्द्रियाणां व्ययोदयः[7] ।। ५३ ।।
यथा नाग्निभिराकाशं दग्धपूर्वं कदाचन ।
तथा न प्रदहत्येनं मृत्युव्याधिजराग्नयः ।। ५४ ।।
पृथिव्यम्बौ जलं[8] वायौ वायुर्व्योम्नि प्रतिष्ठितः ।
अप्रतिष्ठितमाकाशं वाय्वम्बुक्षितिधातुषु ।। ५५ ।।
स्कन्धधात्विन्द्रियं तद्वत्कर्मक्लेशप्रतिष्ठितम् ।
कर्मक्लेशाः सदायोनिमनस्कारप्रतिष्ठिताः ।। ५६ ।।
अयोनिशोमनस्कारश्चित्तशुद्धिप्रतिष्ठितः ।
सर्वधर्मेषु चित्तस्य प्रकृतिस्त्वप्रतिष्ठिता[9] ।। ५७ ।।
पृथिवीधातुवज्ज्ञेयाः[10] स्कन्धायतनधातवः ।
अब्धातुसदृशा ज्ञेयाः कर्मक्लेशाः शरीरिणाम् ।। ५८ ।।

1. *yathākramaś aśuddhāvasthām*, B.
2. °*doṣaṣayor*, B; T om. *doṣa*; C as in text.
3. *sans-rgyas-kyi chos* (*Buddhadharmaiḥ*), T; C shows *guṇa*.
4. *atyantavikāra*', B; T and C as in text.
5. *ḥgyur-ba med-paḥi mtshan-ñid-la* (*avikāralakṣaṇam*), T.
6. *satvo*, B; but T and C imply a locative.
7. Cf. *S.*, xviii, 16*ab*, for the phraseology.
8. e.c.; *pṛthivy ayā calam*, B; *sa ni chu-la chu*, T ; 'the earth rests on water, water again on the wind', C.
9. °*sthitāḥ*, B.
10. *jñeyā*, B.



अयोनिशोमनस्कारो विज्ञेयो वायुधातुवत् ।
तदमूलाप्रतिष्ठाना प्रकृतिर्व्योमधातुवत् ।। ५९ ।।
चित्तप्रकृतिमालीनायोनिशो मनसः कृतिः ।
अयोनिशो[1]मनस्कारप्रभवे क्लेशकर्मणी ।। ६० ।।
कर्मक्लेशाम्बुसंभूताः स्कन्धायतनधातवः ।
उत्पद्यन्ते निरुध्यन्ते तत्संवर्तविवर्तवत् ।। ६१ ।।
न हेतुः प्रत्ययो नापि न सामग्री न चोदयः ।
न व्ययो न स्थितिश्चित्तप्रकृतेर्व्योमधातुवत् ।। ६२ ।।
चित्तस्य यासौ प्रकृतिः प्रभास्वरा
न जातु[2] सा द्यौरिव याति विक्रियाम् ।
आगन्तुकै रागमला[3]दिभिस्त्वसा—
वुपैति संक्लेशमभूतकल्पजैः ।। ६३ ।।

कथमनेनाकाशदृष्टान्तेन तथागतधातोर[4]शुद्धावस्थायामविकारधर्मता परिदीपिता । तदुच्यते ।

नाभिनिर्वर्तयत्येनं कर्मक्लेशाम्बुसंचयः ।
न निर्दहत्युदी (25*a*) र्णोऽपि मृत्युव्याधिजरानलः[5] ।।६४।।

1. e.c. ; B om. *manasaḥ kṛtiḥ*/*ayoniśo*; *tshul-bzhin, ma-yin yid-byed ni*. . *tshul-bzhin ma-yin yid-byed-kyis*, T ; C similarly.
2. e.c. ; *yā tu*, B ; T om.
3. *rāgamanādibhis*, B; *ḥdod-chags sogs*. . *dri-mas*, T; '*kleśas*',C.
4. For °*dhātor* T has *sñiṅ-po* (°*garbhasya*): C as in text.
5. According to C two verses are missing here in B and T before 64 ; it gives the meaning as follows, *Ayoniśomanaskāra* is the wind, *karmakleśa* the water, and *cittaprakṛti* space, which is not produced in dependence on these two. *Śuddhacittaprakṛti* has the characteristics of space, as that which the wind of *ayoniśomanaskāra* cannot disperse'. It has the same extent of commentary as B and T, whose form seems to imply a mention of *ayoniśomanaskāra* in the kārikās. Possibly 64 is a quotation, however, not a kārikā. In 64*a* B

यद्वदयोनिशो[1]मनस्कारवातमण्डलसंभूतं कर्मक्लेशोदकराशिं प्रतीत्य स्कन्धधात्वायत[2]नलोकनिर्वृत्त्या चित्तप्रकृतिव्योमधातोर्विवर्तो[3] न भवति । तद्वदयोनिशोमनस्कारकर्मक्लेशवाय्वप्स्कन्धप्रतिष्ठितस्य[4] स्कन्धधात्वायतनलोकस्यास्तंगमाय मृत्युव्याधिजराग्निस्कन्धसमुदयादपि तदसंवर्तो वेदितव्यः । इत्येवमशुद्धावस्थायां भाजनलोकवदशेषक्लेश (XII*a*) कर्मजन्मसंक्लेशसमुदयास्तंगमेऽप्याकाशवदसंस्कृतस्य तथागतधातोर[5]नुत्पादानिरोधादत्यन्तमविकारधर्मता परिदीपिता । एष च प्रकृतिविशुद्धिमुखं धर्मालोकमुखमारभ्याकाशदृष्टान्तो विस्तरेण यथासूत्रमनुगन्तव्यः । कविमर्षा[6] क्लेशाः । आलोको विशुद्धिः । दुर्बलाः क्लेशाः । बलवती विपश्यना[7] । आगन्तुकाः क्लेशाः । मूलविशुद्धा प्रकृतिः । परिकल्पाः क्लेशाः । अपरिकल्पा प्रकृतिः । तद्यथा मार्षा इयं महापृथिव्यप्सु प्रतिष्ठिता । आपो वायौ प्रतिष्ठिताः । वायुराकाशे प्रतिष्ठितः । अप्रतिष्ठितं चाकाशम् । एवमेषां[8] चतुर्णां धातूनां पृथिवीधातोरब्धातोर्वायुधातोराकाशधातुरेव बली यो दृढोऽचलोऽनुपचयो[9] ऽनपचयोऽनुत्पन्नोऽनिरुद्धः स्थितः स्वरसयोगेन । तत्र य[10] एते त्रयो धातवस्त उत्पादभङ्गयुक्ता अनवस्थिता अचिरस्थायिनः । दृश्यत एषां विकारो न पुनराकाशधातोः[11] (25*b*) कश्चिद्विकारः । एवमेव

has *nābhinirvṛttayaty* and T *mnon-par ḥgrub-min-te*, which indicate the text, but C has 'rot by wetting,' the Sanskrit equivalent of which is not obvious, and which is a more probable sense in view of the parallelism of *nirdahati* and *anala* in the second line.

1. *yadvad yoniśo*, B; T and C as in text.
2. B om. *ta*.
3. °*dhāto vivartte* B.
4. *prasthitasya*, B.
5. *de-bzhin gśegs-paḥi sñiṅ-po* (*Tathāgatagarbhasya*), T.
6. *māṣā*, B. I retain *kavir* in view of A and B's agreement, but can find no other authority for the word. T translates it by *mun-pa* (*tamas*); and C renders 'the *kleśas* are *asvabhāva* in origin'. C attributes the quotation to the *Dhāraṇīśvararājasūtra*, O to the *Gaganagañjasūtra*.
7. B om. *pa*.
8. *eteṣāṁ*, B.
9. T om. *anupacayaḥ* and C has instead of it 'inactive' (*anīha* ?).
10. *tatra va ete*, B.
11. *āśadhātoḥ*, B.



स्कन्धधात्वायतनानि कर्मक्लेशप्रतिष्ठितानि । कर्मक्लेशा अयोनिशोमनस्कारप्रतिष्ठिताः । अयोनिशोमनस्कारः प्रकृतिपरिशुद्धिप्रतिष्ठितः । तत उच्यते प्रकृतिप्रभास्वरं चित्तमागन्तुकैरुपक्लेशैरुपक्लिश्यत[1] इति । तत्र पश्चाद्योऽयोनिशो[2]मनस्कारो ये च कर्मक्लेशा यानि च स्कन्धधात्वायतनानि सर्वं एते धर्मा हेतुप्रत्ययसंगृहीता उत्पद्यन्ते हेतुप्रत्ययविसामग्र्या निरुध्यन्ते । या पुनः सा प्रकृतिस्तस्या न हेतुर्न प्रत्ययो[3] न सामग्री नोत्पादो न निरोधः । तत्र यथाकाशधातुस्तथा प्रकृतिः । यथा वायुधातुस्तथायोनिशोमनसिकारः । यथाब्धातुस्तथा कर्मक्लेशाः । यथा[4] पृथिवीधातुस्तथा[5] स्कन्धधात्वायतनानि । तत उच्यन्ते सर्वधर्मा असारमूला अप्रतिष्ठानमूलाः शुद्धमूला अमूलमूला इति ।

उक्तमशुद्धावस्थायामविकारलक्षण[6]मारभ्य प्रकृतेराकाशधातुसाधर्म्यं तदाश्रितस्यायोनिशोमनसिकारस्य कर्मक्लेशानां च हेतुलक्षणमारभ्य वायुधातुसाधर्म्यमब्धातुसाधर्म्यं च तत्प्रभवस्य स्कन्धधात्वायतनस्य विपाकलक्षणमारभ्य पृथिवीधातुसाधर्म्यम् । तद्विभवकारणस्य तु मृत्युव्याधिजराग्नेरुपसर्गलक्षणमारभ्य तेजोधातुसाधर्म्यं नोक्तमिति तदुच्यते ।

त्रयोऽग्नयो युगान्तेऽग्निर्नारकः प्राकृतः क्रमात् ।
त्रयस्त उपमा तेया मृत्युव्याधिजराग्नयः ॥ ६५ ॥

त्रिभिः[7] (26*a*) कारणैर्यथाक्रमं मृत्युव्याधिजराणामग्निसाधर्म्यं वेदितव्यम् । षडायतननिर्ममीकरणतो विचित्रकारणानुभवनतः[8] संस्कारपरिपाकोपनयनतः । एभिरपि मृत्युव्याधिजराग्निभिरविकारत्वमारभ्य तथागतधातोरशुद्धावस्थायामिदमुक्तम्[9] । लोकव्यवहार एष भगवन् मृत इति वा जात इति

1. °*klisyata*, B.
2. *paścād yoniśo*, B; *paścā yoniśo*, A; *de-la tshul-bzhin ma-yin-paḥi yid-la byed-pas gan-yin-pa* (text, omitting *paścād*), T.
3. *hetuḥ/pratyayo*, B.
4. A adds *ca*, which T omits.
5. B om. *sta*. The quotation is unidentified.
6. '*avikalpalakṣaṇam*', C.
7. C om. these two sentences.
8. *kāraṇā*, 'suffering' (*sdug-bsṅal*).
9. From the *Āryaśrīmālāsūtra*.

वा। मृत इति भगवन्निन्द्रियोपरोध एषः। जात इति भगवन् नवानामिन्द्रियाणां प्रादुर्भाव एष। न पुनर्भगवंस्तथागतग(XII*b*)र्भो जायते वा जीर्यति वा म्रियते वा च्यवते वोत्पद्यते वा। तत्कस्माद्धेतोः। संस्कृतलक्षणविषयव्यतिवृत्तो भगवंस्तथागतगर्भो नित्यो ध्रुवः शिवः शाश्वत[1] इति।

तत्राशुद्धशुद्धा[2]वस्थायामविकारार्थमारभ्य श्लोकः।

निर्वृत्तिव्युपरमरुग्जराविमुक्ता[3]
अस्यैव प्रकृतिमनन्यथावगम्य।
जन्मादिव्यसनमृतेऽपि तन्निदानं
धीमन्तो जगति कृपोदयाद्भ[4]जन्ते ॥ ६६ ॥

अनेन किं दर्शयति।

मृत्युव्याधिजरादुःखमूलमार्यैरपोद्धृतम्[5]।
कर्मक्लेशवशाज्जातिस्त[6]दभावान्न तेषु तत् ॥ ६७ ॥

अस्य खलु मृत्युव्याधिजरादुःख[7]वह्नेरशुद्धावस्थायामयोनिशोमनसिकार[8]कर्मक्लेशपूर्विका जातिरिन्धन[9]मिवोपादानं भवति। यस्य मनोमयात्मभावप्रतिलब्धेषु बोधिसत्त्वेषु शुद्धाशुद्धावस्थायामत्यन्तम[10]नाभासगमनादितर[11]स्यात्यन्तमनुज्ज्वलनं प्रज्ञायते।

1. Note that *Laṅkāvatārasūtra*, p. 78, line 1, says that the sūtras attribute these four qualities to the Tathāgatagarbha.
2. *tatrāśuddhāsuddhā°*, B. T om. *artham*.
3. C seems to have read *°vimuktām*, a better reading; T is ambiguous.
4. B om. *dbha*.
5. *apodṛtaṁ*, B.
6. *jāti tad*, B.
7. *dukha*, B: T om. *duḥkha*, but C has it.
8. B om. *ra*.
9. *jātir ivandhanam*, B.
10. *°sthāyām anatyantam*, B.
11. *itirasyā°*, B.



जन्ममृत्युजराव्याधीन् दर्शयन्ति कृपात्मकाः।
जात्यादिवि(26*b*)निवृत्ताश्च[1] यथाभूतस्य दर्शनात् ॥ ६८ ॥

कुशलमूलसंयोजनाद्धि बोधिसत्त्वाः संचिन्त्योपपत्तिवशितासंनिःश्रयेण करुणया त्रैधातुके संश्लिष्यन्ते[2]। जातिमप्युपदर्शयन्ति जरामपि व्याधिमपि मरणमप्युपदर्शयन्ति। न च तेषामिमे जात्यादयो धर्माः संविद्यन्ते। यथापि[3] तदस्यैव धातोर्यथाभूतमजात्यनुत्पत्तिदर्शनात्[4]। सा पुनरियं बोधिसत्त्वावस्था विस्तरेण यथासूत्रमनुगन्तव्या। यदाह[5]। कतमे च ते संसारप्रवर्तकाः कुशलमूलसंप्रयुक्ताः क्लेशाः। यदुत पुण्यसंभारपर्येष्ट्यतृप्तता[6]। संचिन्त्यभवोपपत्तिपरिग्रहः। बुद्धसमवधानप्रार्थना। सत्त्वपरिपाकापरिखेदः। सद्धर्मपरिग्रहोद्योगः। सत्त्वकिंकरणीयोत्सुकता। धर्मरागानुशयानुत्सर्गः। पारमितासंयोजनानामपरित्यागः। इत्येते सागरमते कुशलमूलसंप्रयुक्ताः क्लेशा यैर्बोधिसत्त्वाः संश्लिष्यन्ते। न खलु क्लेशदोषैर्लिप्यन्ते। आह पुनः। यदा भगवन् कुशलमूलानि तत्केन कारणेन क्लेशा इत्युच्यन्ते। आह। तथा हि सागरमते एभिरेवंरूपैः क्लेशैर्बोधिसत्त्वास्त्रैधातुके श्लिष्यन्ते। क्लेशसंभूतं च त्रैधातुकम्। तत्र बोधिसत्त्वा उपायकौशलेन च कुशलमूलबलान्वाधानेन च संचिन्त्य त्रैधातुके श्लिष्यन्ते। तेनोच्यन्ते कुशलमूलसंप्रयुक्ताः क्लेशा इति। यावदेव[7] त्रैधातुके श्लेषतया न पुनश्चित्तोपक्लेशतया।

स्याद्यथापि नाम सागरमते श्रेष्ठिनो गृहपतेरेक(27*a*)पुत्रक इष्टः कान्तः[8] प्रियो मनापो[9]ऽप्रतिकूलो दर्शनेन स च दारको बालभावेन नृत्यन्नेव मीढकूपे प्रपतेत। अथ ते तस्य दारकस्य मातृज्ञातयः[10] पश्येयुस्तं दारकं मीढकूपे प्रपतितम्। दृष्ट्वा च गम्भीरं निश्वसेयुः[11] शोचेयुः परिदेवेरन्। न पुनस्तं मीढकूपमवरुह्य

1. T's *ḥdas-gyur* suggests *vyativṛttāś*.
2. e.c.; *saṁklisyante*, B; *saṁslisyante*, A apparently; *sbyar-ro*, T; 'they appear', C.
3. T apparently omits *yathāpi*.
4. C may have read *ajātyanirodhadarśanāt*.
5. From the *Sāgaramatiparipṛcchā*.
6. *sambhāraḥ / ryeṣṭatṛptatā*, B.
7. *yāvad evaṁ*, B.
8. T om. *iṣṭaḥ* or *kāntaḥ*.
9. *namāpo*, A.
10. *mātāpitṛjnātayaḥ*, A; so also C, which makes the rescuer someone else than the father.
11. B seems to read *viṣvaṣeyuḥ*.

तं दारकमध्यालम्बेरन् । अथ तस्य दारकस्य पिता तं प्रदेशमागच्छेत् । स पश्येतैकपुत्रकं मीढकूपे प्रपतितं दृष्ट्वा[1] च शीघ्रशीघ्रं त्वरमाणरूप एकपुत्रकाध्याशयप्रेमानुनीतो[2]ऽजुगु(XIII*a*)प्समानस्तं मीढकूपमवरुह्यैकपुत्रकमभ्युत्क्षिपेत् । इति हि सागरमते उपमैषा कृता यावदेवार्थस्य विज्ञप्तये । कः प्रबन्धो द्रष्टव्यः । मीढकूप इति सागरमते त्रैधातुकस्यैतदधिवचनम् । एकपुत्रक इति सत्त्वानामेतदधिवचनम् । सर्वसत्त्वेषु हि बोधिसत्त्वस्यैकपुत्रसंज्ञा प्रत्युपस्थिता भवति । मातृज्ञातय[3] इति श्रावकप्रत्येकबुद्धयानीयानां पुद्गलानामेतदधिवचनं ये संसारप्रपतितान् सत्त्वान् दृष्ट्वा शोचन्ति परिदेवन्ते न पुनः समर्था भवन्त्यभ्युत्क्षेप्तुम् । श्रेष्ठी गृहपतिरिति बोधिसत्त्वस्यैतदधिवचनं यः शुचिर्विमलो[4] निर्मलचित्तोऽसंस्कृतधर्मप्रत्यक्षगतः संचिन्त्य त्रैधातुके प्रतिसंदधाति सत्त्वपरिपाकार्थम् । सेयं सागरमते बोधिसत्त्वस्य महाकरुणा यदत्यन्तपरिमुक्तः सर्वबन्धनेभ्यः पुनरेव भवोपपत्तिमुपाददाति । उपायकौशल्यप्रज्ञापरिगृहीतश्च संक्लेशैर्न लिप्यते । सर्व(27*b*)क्लेशबन्धनप्रहाणाय[5] च सत्त्वेभ्यो धर्मं देशयतीति । तदनेन सूत्रपदनिर्देशेन[6] परहितक्रियार्थं वशिनो बोधिसत्त्वस्य संचिन्त्यभवोपपत्तौ कुशलमूलकरुणाबलाभ्या[7]मुपश्लेषादुपायप्रज्ञाबलाभ्यां च तदसंक्लेशादशुद्धशुद्धावस्था परिदीपिता ।

तत्र यदा बोधिसत्त्वो यथाभूताजात्यनुत्पत्तिदर्शनमागम्य तथागतधातोरिमां[8] बोधिसत्त्वधर्मतामनुप्राप्नोति तथा विस्तरेण यथासूत्रमनुगन्तव्यम्[9] । यदाह । पश्य सागरमते धर्माणामसारताम[10]कारकतां निरात्मतां निःसत्त्वतां

1. B om. *dṛṣṭvā*.
2. °*ādhyāśayapremānunīto* is a doubtful reading, A being blurred and B practically illegible; *ḥdon-par* (or *ḥdren-par*) *ḥdod-paḥi sred-pas byas-te*, T, for which, if correct, the equivalent is not clear; C is no help.
3. *mātāpitṛjñātaya*, A; 'father, mother and relations', C.
4. T om. *vimalo*.
5. B om. *ya*.
6. B om. *rde*, and T *nirdeśena*.
7. *bodhisatvasya mahākaruṇā yad atyantaparimuktaḥ karuṇā-balābhyām*, B; T as in text, omitting *bala*, which C has.
8. °*dhātoḥ māṁ*, B.
9. *yathāsūtrasarttavyaṁ*, B; A om. *yathā*; T as in text.
10. *asārakatām*, B. The quotation, the first part of which C omits, is from the *Sāgaramatiparipṛcchā* (O).



निर्जीवतां निःपुद्गलतामस्वामिकताम् । यत्र हि नाम यथेष्यन्ते तथा विठप्यन्ते[1] विठपिताश्च समाना न चेतयन्ति न प्रकल्पयन्ति[2] । इमां सागरमते धर्मविठपनामधिमुच्य बोधिसत्त्वो[3] न कस्मिंश्चिद्धर्मे परिखेदमुत्पादयति । तस्यैव ज्ञानदर्शनं शुचि शुद्धं भवति । नात्र कश्चिदुपकारो वापकारो वा[4] क्रियत इति । एवं च धर्माणां धर्मतां यथाभूतं प्रजानाति । एवं च महाकरुणासंनाहं न त्यजति । स्याद्यथापि नाम[5] सागरमतेऽनर्घं वैडूर्यमणिरत्नं स्ववदापितं सुपरिशुद्धं सुविमलं कर्दमपरिक्षिप्तं वर्षसहस्रमवतिष्ठेत । तद्वर्षसहस्रात्ययेन ततः कर्दमादभ्युत्क्षिप्य लोड्येत[6] पर्यवदाप्येत । तत्सु[7]धौतं परिशोधितं पर्यवदापितं समानं तमेव शुद्धविमलमणिरत्नस्वभावं न जह्यात्[8] । एवमेव सागरमते बोधिसत्त्वः सत्त्वानां प्रकृतिप्रभास्वरतां चित्तस्य प्रजानाति । तां पुनरागन्तुको(28*a*)पक्लेशोपक्लिष्टां पश्यति । तत्र बोधिसत्त्वस्यैवं भवति । नैते क्लेशाः सत्त्वानां चित्तप्रकृतिप्रभास्वरतायां प्रविष्टाः । आगन्तुका एते क्लेशा अभूतपरिकल्पसमुत्थिताः । शक्नुयामहं पुनरेषां सत्त्वानामागन्तुक्लेशापनयनाय[9] धर्मं देशयितुमिति । एवमस्य नावलीयनाचित्तमुत्पद्यते । तस्य भूयस्या मात्रया सर्वसत्त्वानामन्तिके प्रमोक्षचित्तोत्पाद उत्पद्यते । एवं चास्य भवति । नैतेषां क्लेशानां[10] किंचिद्बलं स्थाम वा । अबला दुर्बला एते[11] क्लेशाः । नैतेषां किंचिद्भूतप्रतिष्ठानम् । अभूतपरि-

1. B repeats *pyante*; A om. *viṭhapi*; T om. *tathā viṭhapyante viṭhapitāś ca samānā*.
2. A om. *na prakalpayanti*.
3. *bodhisatva*, B. T translates *viṭhapanā* by *gzhan-du mi-ḥgyurba*, 'not developing elsewhere'. Cf. *Abhisamayālaṁkārāloka* (ed. Wogihara), p. 370, for this passage.
4. *kasyacid upakāro apakāro vā*, A ; *ḥdi-la ḥgaḥ yaṅ phan ḥdogs-pa ḥam*, (*nātra kaścid apy upakāro vā*), T.
5. A om. *nāma*.
6. The root *luḍ* in the sense *manthane*, 'rub', does not appear to have been recorded elsewhere in literature.
7. B om. *tat*.
8. *tyahyāt* (for *tyajyāt*), B.
9. Reading uncertain. °*kleśāpanayāyaya*, B; °*kleśānāṁ panayanāya*, A; *ñe-bar ñon-moṅs-pa zhi-bar bya-baḥi phyir*, (*sattvānām upakleśaśamanāya* ?), T. C understands, 'cause the beings to get rid of the *āgantukakleśamalas*'.
10. *saṁkleśānāṁ*, A.
11. *yate*, B.

कल्पिता[1] एते क्लेशाः। ते यथाभू(XIIIb)तयोनिशो[2]मनसिकारनिरीक्षिता न कुप्यन्ति। तेऽस्माभिस्तथा प्रत्यवेक्षितव्या[3] यथा न भूयः श्लिष्येयुः। अश्लेषो हि क्लेशानां साधुर्न पुनः श्लेषः। यद्यहं क्लेशानां श्लिष्येय तत्कथं क्लेशबन्धनबद्धानां सत्त्वानां क्लेशबन्धनप्रहाणाय धर्मं देशयेयम्। हन्त वयं[4] क्लेशानां च न श्लिष्यामहे क्लेशबन्धनप्रहाणाय च सत्त्वेभ्यो धर्मं देशयिष्यामः। ये पुनस्ते संसारप्रबन्धकाः कुशलमलसंप्रयुक्ताः क्लेशास्तेऽस्माभिः सत्त्वपरिपाकाय श्लेष्टव्यमिति।

संसारः पुनरिह त्रैधातुकप्रतिबिम्बकमनास्रवधातौ मनोमयं कायत्रयमभिप्रेतम्। तद्ध्यनास्रवकुशलमूलाभिसंस्कृतत्वात् संसारः। सास्रवकर्मक्लेशानभिसंस्कृतत्वान्निर्वाणमपि तत्। यदधिकृत्याह[5]। तस्माद्भगवन्नस्ति संस्कृतोऽप्यसंस्कृतोऽपि संसारः। अस्ति संस्कृतमप्यसंस्कृतमपि निर्वाणमिति[6]। (28b) तत्र संस्कृता[7]संस्कृतसंसृष्टचित्तचैतसिकसमुदाचारयोगादियमशुद्धशुद्धावस्थेत्युच्यते। सा पुनरास्रवक्षयाभिज्ञाभिमुख्य[8]सङ्गप्रज्ञापारमितभावनया महाकरुणाभावनया च[9] सर्वसत्त्वधातुपरित्राणाय तदसाक्षात्करणादाभिमुख्यां बोधिसत्त्वभूमौ प्राधान्येन व्यवस्थाप्यते।

यथोक्तमास्रवक्षयज्ञानमारभ्य नगरोदाहरणम्[10]। एवमेव कुलपुत्र बोधिसत्त्वो महता यत्नेन महता वीर्येण दृढयाध्याशयप्रतिपत्त्या[11] पञ्चाभिज्ञा उत्पादयति। तस्य ध्यानाभिज्ञापरिकर्मकृतचित्तस्यास्रवक्षयोऽभिमुखीभवति। स महाकरुणाचित्तोत्पादेन सर्वसत्त्वपरित्राणायास्रवक्षयज्ञाने परिजयं कृत्वा पुनरपि

1. *abhūtāparikalpitāḥ*, B.
2. A om. *yoniśo*.
3. *pratyavekṣitāḥ*, B.
4. *hetur ayam*, B; *ḥoṅ-kyaṅ kho-bos*, T.
5. From the *Āryaśrīmālāsūtra*.
6. B adds *tatra saṁskṛtāsaṁ*(28b)*skṛtam api nirvāṇam iti*.
7. B om. *saṁskṛtā°*.
8. *°mukhyām asaṅga°*, B.
9. A om. *ca*.
10. *meḥi dper brjod-pa*, T (read *miḥi* and understand *narodāharaṇam* with O?). C quotes the parable in full and attributes it and the following passage to the *Ratnamālāsūtra*.
11. *dṛḍha adhyāśayaprapattyā*, B.



सुपरिकर्मकृतचेताः[1] षष्ठ्यामसङ्गप्रज्ञोत्पादादास्रवक्षयेऽभिमुखीभवति[2]। एवमस्यामाभिमुख्यां बोधिसत्त्वभूमावास्रवक्षयसाक्षात्करणवशित्वलाभिनो बोधिसत्त्वस्य विशुद्धावस्था परिदीपिता। तस्यैवमात्मना सम्यक्प्रतिपन्नस्य परानपि चास्यामेव सम्यक्प्रतिपत्तौ स्थापयिष्यामीति[3] महाकरुणया विप्रतिपन्नसत्त्वपरित्राणाभिप्रायस्य शमसुखानास्वादनतया तदुपायकृतपरिजयस्य संसारा[4]भिमुखसत्त्वापेक्षया निर्वाणविमुखस्य[5] बोध्यङ्गपरिपूरणाय ध्यानैर्विहृत्य पुनः कामधातौ संचिन्त्योपपत्तिपरिग्रहणतो यावदाशु सत्त्वानामर्थं कर्तुकामस्य विचित्रतिर्यग्योनिगतजातकप्रभेदेन पृथग्जनात्मभावसंदर्शनविभुत्वलाभिनोऽविशुद्धा(29a)वस्था परिदीपिता।

[6]अपरः श्लोकार्थः

धर्मतां प्रतिविच्येमामविकारां जिनात्मजः।
दृश्यते यदविद्यान्धैर्जात्यादिषु तदद्भुतम् ॥ ६९ ॥
अत एव जगद्बन्धोरुपायकरुणे परे।
यदार्यगोचरप्राप्तो दृश्यते बालगोचरे ॥ ७० ॥
सर्वलोकव्यतीतोऽसौ न च लोकाद्विनिःसृतः।
लोके चरति लोकार्थमलिप्तो लौकिकैर्मलैः ॥ ७१ ॥
यथैव नाम्भसा पद्मं लिप्यते जातमम्भसि।
तथा लोकेऽपि जातोऽसौ लोकधर्मैर्न लिप्यते[7] ॥७२॥

1. *°cetasaḥ*, B.
2. *āsraya āmukhībhavati*, B; T shows *abhi* (*mṅon-du*). C enlarges this passage, describing also the attainments of the fourth and fifth *bhūmis*.
3. *sthāsyāmīti*, B.
4. B om. *rā*.
5. *mya-ṅan-las ḥdas-pa-la mṅon-du phyogs-par* (*nirvāṇābhimukhasya*), T.
6. C omits from here up to verse 79. Verses 69-78 and the commentary on them may therefore be later additions; the heading to them is suspicious and their omission would improve the arrangement of the exposition. But verse 76 is in the first of C's translations.
7. Cf. *S.*, xiii, 4-6; *d*=6*d*.

नित्योज्ज्वलितबुद्धिश्च कृत्यसंपादनेऽग्निवत् ।
शान्तध्यानसमापत्तिप्रतिपन्नश्च सर्वदा ॥ ७३ ॥
पूर्वाविधवशात् सर्वविकल्पापगमाच्च सः ।
न पुनः कुरुते यत्नं[1] परिपाकाय देहिनाम् ॥ ७४ ॥
यो यथा येन वैनेयो मन्यतेऽसौ तथैव तत् ।
देशन्या रूपकायाभ्यां चर्ययेर्यापथेन वा[2] ॥ ७५ ॥
अनाभोगेन तस्यैवमव्याहतधियः सदा ।
जगत्याकाशपर्यन्ते सत्त्वार्थः संप्रवर्तते ॥ ७६ ॥
एतां गतिमनुप्राप्तो बोधिसत्त्वस्तथागतैः ।
समतामेति लोकेषु सत्त्वसंतारणं[3] प्रति ॥ ७७ ॥
अथ चाणोः पृथिव्याश्च गोस्पदस्योदधेश्च यत् ।
अन्तरं बोधिसत्त्वानां बुद्धस्य च तदन्तरम् ॥ ७८ ॥

एषां दशानां श्लोकानां यथाक्रमं नवभिः श्लोकैः प्रमुदिताया बोधिसत्त्वभूमेरधश्च संक्लेशपरमतां दशमेन श्लोकेन धर्ममेघाया बोधिसत्त्वभूमेरूर्ध्वं विशुद्धिपरमतामुपनिधाय समासतश्चतुर्णां बोधिसत्त्वानां दशसु बोधिसत्त्व[4]-भूमिषु विशुद्धिरविशुद्धिश्च परिदीपिता । चत्वारो बोधिसत्त्वाः प्रथमचित्तोत्पादिकः । चर्याप्रति(29*b*)पन्नः । अवैवर्तिकः । एकजातिप्रतिबद्ध इति । तत्र प्रथम[5]द्वितीयाभ्यां श्लोकाभ्यामनादिकालिकमदृष्टपूर्वप्रथमलोकोत्तरधर्मताप्रतिवेधात् प्रमुदितायां भूमौ[6] प्रथमचित्तोत्पादिकबोधिसत्त्वगणविशुद्धि[7]लक्षणं परिदीपितम् । त्रितीयचतुर्थाभ्यां श्लोकाभ्यामनुपलिप्तचर्याचरणाद्विमलां[8]

1. A's f.xiii*b* ends here.
2. *varyeryāpathena vā*, B (one syllable short); *spyod daṅ spyod-lam-gyis*, T.
3. °*sāṁtāraṇaṁ*, B.
4. T om. *bodhisattva*.
5. T om. *prathama*.
6. *sa daṅ-po rab-tu dgaḥ-ba-la* (*pramuditāyāṁ prathamabhūmau*), T.
7. *yoṅs-su dag-paḥi* (°*pariśuddhi*°), T.
8. *vimalā*, B.



भूमिमुपादाय यावद्दूरंगमायां भूमौ चर्याप्रतिपन्नबोधिसत्त्वगुणविशुद्धि[1]लक्षणं परिदीपितम् । पञ्चमेन श्लोकेन निरन्तरमहाबोधिसमुदागम[2]प्रयोगसमाधिषु व्यवस्थितत्वादचलायां भूमाववैवर्तिकबोधिसत्त्वगुणविशुद्धिलक्षणं परिदीपितम् । षष्ठेन सप्तमेनाष्टमेन च श्लोकेन सकलस्वपरार्थसंपादनोपायनिष्ठागतस्य[3] बुद्धभूम्येकचरमजन्मप्रतिबद्धत्वादनुत्तरपरमाभिसंबोधिप्राप्तेर्धर्ममेघायां बोधिसत्त्वभूमावेक[4]जातिप्रतिबद्धबोधिसत्त्वगुणविशुद्धि[5]लक्षणं परिदीपितम् । नवमेन दशमेन च श्लोकेन परार्थमात्मार्थं चारभ्य निष्ठागतबोधिसत्त्वतथागतयोर्गुणविशुद्धेर[6]विशेषो विशेषश्च परिदीपितः ।

तत्र सुविशुद्धा[7]वस्थायामविकारार्थमारभ्य श्लोकः ।

अनन्यथात्माक्षयधर्मयोगतो
जगच्छरण्योऽनपरान्तकोटितः ।
सदाद्वयोऽसाववविकल्पकत्वतो
ऽविनाशधर्माप्यकृतस्वभावतः ॥ ७९ ॥

अनेन किं दर्शयति ।

न जायते न म्रियते बाध्यते नो न जीर्यते[8] ।
स नित्यत्वाद्ध्रुवत्वाच्च शिवत्वाच्छाश्वत(30*a*)त्वतः ॥८०
न जायते स नित्यत्वा[9]दात्मभावैर्मनोमयैः ।
अचिन्त्यपरिणामेन[10] ध्रुवत्वान् म्रियते[11] न सः ॥८१॥

1. *yoṅs-su dag-paḥi* (°*pariśuddhi*°), T.
2. *bodhisatvasamudāgama*°, B; T om. *sattva*.
3. °*niryātasya*, B; *mthar phyin-pa*, T which does not show case-ending.
4. B adds *ekajātipratibaddhabodhisatvabhūmau*.
5. *yoṅs-su dag-paḥi* (*pariśuddhi*), T.
6. T om. *viśuddher*.
7. *ta viśuddhā*°, B; *de-la śin-tu rnam-par dag-paḥi*, T; C as in text.
8. Cf. *Buddhac.*, xii, 22.
9. B om. *tvā*.
10. °*pariṇāmena macintyaś cyutya dhruva*°, B; possibly an old interpolation, as T also shows *cyuti* in *d*.
11. *mryate*, B.

वासनाव्याधिभिः सूक्ष्मैर्बाध्यते न शिवत्वतः ।
अनास्रवा[1]भिसंस्कारैः शाश्वतत्वान्न जीर्यते ॥८२॥

स खल्वेष तथागतधातुर्बुद्धभूमावत्यन्तविमल[2]विशुद्धप्रभास्वरतायां स्वप्रकृतौ स्थितः पूर्वान्तमुपादाय नित्यत्वान्न पुनर्जायते मनोमयैरात्मभावैः । अपरान्तमुपादाय ध्रुवत्वान्न पुनर्म्रियतेऽचिन्त्यपारिणामिक्या[3] च्युत्या । पूर्वापरान्तमुपादाय शिवत्वान्न पुनर्बाध्यतेऽविद्यावासभूमिपरिग्रहेण । यश्चैवमनर्थापतितः स शाश्वतत्वान्न पुनर्जीर्यत्य[4]नास्रवकर्मफलपरिणामेन ।

तत्र द्वाभ्यामथ द्वाभ्यां द्वाभ्यां द्वाभ्यां[5] यथाक्रमम् ।
पदाभ्यां नित्यताद्यर्थो विज्ञेयोऽसंस्कृते पदे ॥ ८३ ॥

तदेषामसंस्कृतधातौ चतुर्णां नित्यध्रुवशिवशाश्वतपदानां यथाक्रममेकैकस्य पदस्य द्वाभ्यां द्वाभ्यामुद्देशनिर्देश[6]पदाभ्यामर्थप्रविभागो यथासूत्रमनुगन्तव्यः[7] । यदाह । नित्योऽयं शारिपुत्र धर्मकायोऽनन्यत्वधर्माक्षयधर्मतया । ध्रुवोऽयं शारिपुत्रधर्मकायो ध्रुवशरणोऽपरान्तकोटिसमतया । शिवोऽयं शारिपुत्र धर्मकायोऽद्वयधर्माविकल्पधर्मतया । शाश्वतोऽयं शारिपुत्र धर्मकायोऽविनाशधर्माकृत्रिमधर्मतयेति ।

1. *anaśravā°*, B.
2. B om. *vimale*; *dri-med-cin*, T; C shows *vimala* too.
3. *°pariṇāmikyā*, B.
4. B reads *jīryati* / *anāsrava°* here, though it reads *jīryate* in verse 80.
5. In *b* B om. one *dvābhyām* and has *svābhyām* for the other; C and T as in text.
6. *uddeśanideśanirdeśa°*, B; *bstan-pa dan bśad-pa*, T.
7. B and T add two verses here, which C omits and which must be interpolations, as the quotation from the sūtra clearly follows directly on the reference to it in the previous sentence. They are simply an enlargement of 79 and run as follows :

*Nityārtho'nanyathātmatvam akṣayyaguṇayogataḥ* /
*Dhruvārthaḥ śaraṇātmatvam antakoṭisamānataḥ* //
*Śivārtho'dvayadharmatvam avikalpasvabhāvataḥ* /
*Śāśvatārtho'vināśitvam akṛtrimaguṇatvataḥ* //

B om. *kṛ* in the last line. The quotation according to C is from the *Anūnatvāpūrṇatvanirdeśaparivarta*.



अस्यामेव विशुद्धावस्थायामत्यन्तव्यवदा(30*b*)ननिष्ठागमनलक्षणस्य तथागतगर्भस्या[1]संभेदार्थमारभ्य श्लोकः ।

स धर्मकायः स तथागतो यत–
स्तदार्यसत्यं परमार्थनिर्वृतिः ।
अतो न बुद्धत्वमृतेऽर्करश्मिवद्
गुणाविनिर्भागतयास्ति निर्वृतिः ॥ ८४ ॥

तत्र पूर्वश्लोकार्धेन कि दर्शयति ।

धर्मकायादिपर्याया वेदितव्याः समासतः ।
चत्वारोऽनास्रवे धातौ चतुरर्थप्रभेदतः ॥ ८५ ॥

समासतोऽनास्रवे धातौ तथागतगर्भे चतुरोऽर्थानधिकृत्य चत्वारो नामपर्याया वेदितव्याः । चत्वारोऽर्थाः कतमे ।

बुद्धधर्माविनिर्भागस्तद्गोत्रस्य तथागमः ।
अमृषामोषधर्मित्वमादिप्रकृतिशान्तता ॥ ८६ ॥

बुद्धधर्माविनिर्भागार्थः । यमधिकृत्योक्तम्[2] । अशून्यो भगवंस्तथागतगर्भो गङ्गानदीवालुकाव्यतिवृत्तैरविनिर्भागैरमुक्तज्ञैरचिन्त्यैर्बुद्धधर्मैरिति । तद्गोत्रस्य प्रकृतेरचिन्त्यप्रकारसमुदागमार्थः । यमधिकृत्योक्तम्[3] । षडायतनविशेषः स तादृशः परंपरागतोऽनादिकालिको धर्मताप्रतिलब्ध इति । अमृषामोषार्थः । यमधिकृत्योक्तम्[4] । तत्र परमार्थसत्यं यदिदममोषधर्मि निर्वाणम् । तत्कस्माद्धेतोः । नित्यं तद्गोत्रं समधर्मतयेति[5] । अत्यन्तोपशमार्थः । यमधिकृत्योक्तम्[6] । आदिपरिनिर्वृत एव तथागतोऽर्हन् सम्यक्संबुद्धोऽनुत्पन्नोऽनिरुद्ध

1. *Tathāgatadhātor*, B; C and T as in text.
2. From the *Āryaśrīmālāsūtra*.
3. From the *Ṣaḍāyatanasūtra* (C).
4. Probably from the *Āryaśrīmālāsūtra* (O).
5. So B, but the reading is uncertain; *gtan-du zhi-baḥi chos-ñid-kyis-na* (*atyantaśamadharmatayā*), T; C suggests *śāśvatadharmatayā*.
6. From the *Jñānālokālaṁkārasūtra* (O).

इति । एषु चतुर्ष्वर्थेषु यथासंख्यमिम चत्वारो[1] नामपर्याया भवन्ति । तद्यथा धर्मकायस्तथागतः परमार्थसत्यं निर्वाणमिति । यत एवमाह[2] । तथागतगर्भ इति शारि(31*a*)पुत्र धर्मकायस्यैतदधिवचनमिति । नान्यो भगवंस्तथागतोऽन्यो धर्मकायः । धर्मकाय एव भगवंस्तथागत इति । दुःखनिरोधनाम्ना भगवन्नेवंगुणसमन्वागतस्तथागतधर्मकायो देशित इति । निर्वाणधातुरिति भगवंस्तथागतधर्मकायस्यैतदधिवचनमिति ।

तत्रापरेण श्लोकार्धेन किं दर्शयति ।

सर्वाकाराभिसंबोधिः सवासनमलोद्धृतिः ।
बुद्धत्वमथ निर्वाणमद्वयं परमार्थतः ॥ ८७ ॥

यत[3] (xv*a*) एते चत्वारोऽनास्रवधातुपर्यायास्तथागतधातावेकस्मिन्नभिन्नेऽर्थे[4] समवसरन्ति । अत एषामेकार्थत्वादद्वयधर्मनयमुखेन यच्च सर्वाकारसर्वधर्माभिसंबोधाद्बुद्धत्वमित्युक्तं यच्च महाभिसंबोधात् सवासनमलप्रहाणान्निर्वाणमित्युक्तमे[5]तदुभयमनास्रवे धातावद्वयमिति द्रष्टव्यमभिन्नमच्छिन्नम् ।

सर्वाकारैरसंख्येयैर[6]चिन्त्यैरमलैर्गुणैः ।
अभिन्नलक्षणो मोक्षो यो[7] मोक्षः स तथागत इति ॥

यदुक्तमर्हत्प्रत्येकबुद्धपरिनिर्वाणमधिकृत्य[8] । निर्वाणमिति भगवन्नुपाय एष तथा[9]गतानामिति । अनेन दीर्घाध्वपरिश्रान्तानामटवीमध्ये नगरनिर्माणवदविव[10]र्तनोपाय एष धर्मपरमेश्वराणां सम्यक्संबुद्धानामिति परिदीपितम् । निर्वा-

1. B om. *catvāro*; C and T as in text.
2. C gives the first sentence of the quotation to the *Anūnatvāpūrṇatvanirdeśaparivarta* and the rest to the *Āryaśrīmālāsūtra*.
3. B om. *ta*; *gaṅ-gi phyir*, T.
4. °*dhātā ekasminn abhinnārthe*, B; T om. *abhinna*; C not clear.
5. A and B om. *uktam*; T inserts it.
6. *asaṁkṣepair*, B. C attributes the verse to the *Mahāparinirvāṇasūtra*.
7. B om. *kṣo yo*.
8. From the *Āryaśrīmālāsūtra*.
9. B om. *ta* in *Tathāgatānām*.
10. *anivartano*°, B; *mi-ldog-pa*, T



णाधिगमाद् भग[1]वंस्तथागता भवन्त्यर्हन्तः सम्यक्संबुद्धाः सर्वाप्रमेयाचिन्त्यविशुद्धिनिष्ठागतगुणसमन्वागता इति । अनेन चतुराकारगुणनिष्पत्त्यसंभिन्नलक्षणं निर्वाणमधिगम्य तदात्मकाः सम्यक्संबुद्धा भवन्ती(31*b*)ति । बुद्धत्वनिर्वाणयोरविनिर्भागगुणयोगाद्बुद्धत्वमन्तरेण कस्यचिन्निर्वाणाधिगमो[2] नास्तीति परिदीपितम् ।

तत्र तथागतानामनास्रवे धातौ सर्वाकारवरोपेतशून्यताभिनिर्हारतश्चित्रकरदृष्टान्तेन गुणसर्वता वेदितव्या[3] ।

अन्योन्यकुशला यद्वद्भवेयुश्चित्रलेखकाः ।
यो यदङ्गं प्रजानीयात्तदन्यो नावधारयेत् ॥ ८८ ॥
अथ तेभ्यः प्रभू राजा प्रयच्छेद्दूष्यमाज्ञया ।
सर्वैरेवात्र युष्माभिः कार्या प्रतिकृतिर्मम ॥ ८९ ॥
ततस्तस्य प्रतिश्रुत्य युञ्जेरंश्चित्रकर्मणि ।
तत्रैको व्यभियुक्तानामन्यदेशगतो भवेत् ॥ ९० ॥
देशान्तरगते तस्मिन् प्रतिमा तद्वियोगतः ।
न सा सर्वाङ्गसंपूर्णा भवेदित्युपमा कृता ॥ ९१ ॥
लेखका ये तदाकारा दानशीलक्षमादयः ।
सर्वाकारवरोपेता शून्यता प्रतिमोच्यते[4] ॥ ९२ ॥

तत्रैषामेव दानादीनामेकैकस्य बुद्धविषयापर्यन्त[5]प्रकारभेदभिन्नत्वादपरिमितत्वं वेदितव्यम् । संख्याप्रभावाभ्यामचिन्त्यत्वम् । मात्सर्यादिविपक्षमलवासनापकर्षितत्वाद्विशुद्धिपरमत्वमिति । तत्र सर्वाकारवरोपेतशून्यतासमाधिमुखभावनयानुत्पत्तिकधर्मलाभादचलायां बोधिसत्त्वभूमा-

1. °*gamā Bhaga*°, B.
2. *nirvāṇabhigamo*, A; *thob-pa*, T.
3. According to C this parable is taken from the *Ratnamālāsūtra*, whose account it quotes immediately after the verses.
4. *pratiyocyate*, B.
5. °*viṣayaparyanta*°, A; but *yul-la mthaḥ-yas-par*, T, and 'unlimited', C.

वविकल्पनिश्छिद्रनिरन्तरस्वरसवाहिमार्गज्ञानसंनिश्रयेण तथागतानामनास्रवे धातौ गुणसर्वता समुदागच्छति । साधुमत्यां बोधिसत्त्वभूमावसंख्येयसमाधिधारणीमुखसमुद्रैरपरिमाणबुद्धधर्मपरि(32*a*)ग्रहज्ञानसंनिश्रयेण गुणाप्रमेयता समुदागच्छति । धर्ममेघायां बोधिसत्त्वभूमौ सर्वतथागतगुह्यस्थानाविपरोक्षज्ञानसंनिश्रयेण गुणाचिन्त्यता समुदागच्छति । तदनन्तरं बुद्धभूम्यधिगमाय सर्वसवासनक्लेशज्ञेयावरणविमोक्षज्ञान[1]संनिश्रयेण गुणविशुद्धिपरमता समुदागच्छति । यत एषु चतुर्षु भूमिज्ञानसंनिश्रयेष्वर्हत्प्रत्येकबुद्धा[2] न संदृश्यन्ते तस्मात्ते दूरी[3]भवन्ति चतुराकारगुणपरिनिष्पत्त्यसंभिन्नलक्षणान्[4] निर्वाणधातोरित्युक्तम् ।

प्रज्ञाज्ञानविमुक्तीनां दीप्तिस्फरणशुद्धि( xv*b* )तः ।
अभेदतश्च साधर्म्यं प्रभारश्म्यर्कमण्डलैः ॥ ९३ ॥

यया प्रज्ञया येन ज्ञानेन यया विमुक्त्या स[5] चतुराकारगुणनिष्पत्त्यसंभिन्नलक्षणो निर्वाणधातुः सूच्यते तासां यथाक्रमं त्रिभिरेकेन च[6] कारणेन चतुर्विधमादित्यसाधर्म्यं परिदीपितम् । तत्र बुद्धसान्तानिक्या लोकोत्तरनिर्विकल्पायाः परमज्ञेयतत्त्वान्धकारविधमनप्रत्युपस्थानतया प्रज्ञाया दीप्तिसाधर्म्यम् । तत्पृष्ठलब्धस्य सर्वज्ञज्ञानस्य[7] सर्वाकारनिरवशेषज्ञेयवस्तुप्रवृत्ततया रश्मिजालस्फरणसाधर्म्यम् । तदुभयाश्रयस्य चित्तप्रकृतिविमुक्तेरत्यन्तविमलप्रभास्वरतयार्कमण्डलविशुद्धिसाधर्म्यम् । तिसृणामपि धर्मधात्वसंभेदस्वभावतया तत्त्रयाविनिर्भागसाधर्म्यमिति ।

अतोऽनागम्य बुद्धत्वं निर्वाणं नाधिगम्यते ॥
न हि शक्यः प्रभारश्मी निर्वृज्य[8] प्रेक्षितुं रविः ॥ ९४ ॥

1. B om. *na*.
2. °*buddhāḥ*, B.
3. *dūre*, B.
4. A om. *lakṣaṇān*.
5. B om. *sa*.
6. B om. *ca*; *dań rnam-pa gcig-gis* (*ekena cākāreṇa*), T; C's equivalent is not clear (*i*, usually for *artha*).
7. *sarvajñeyajñānasya*, B; *ye-śes śes-bya thams-cad-kyi ye-śes* (*sarvajñānajñeyajñānasya*), T; C as in text.
8. *nivṛjya*, A; *spańs-nas*, T. Cf. *nibbajjayam* at *Theragāthā*, 1105.



यत एवमनादि(32*b*)सांनिध्यस्वभावशुभधर्मोपहिते धातौ तथागतानामविनिर्भागगुणधर्मत्वमतो न तथागतत्व[1]मसङ्गाप्रतिहतप्रज्ञा[2]ज्ञानदर्शनमनागम्य सर्वावरणविमुक्ति[3]लक्षणस्य निर्वाणधातोर[4]धिगमः साक्षात्करणमुपपद्यते प्रभारश्म्यदर्शिन इव सूर्यमण्डलदर्शनम् । अत एवमाह[5] । न हि भगवन् हीनप्रणीतधर्माणां निर्वाणाधिगमः । समधर्माणां[6] भगवन् निर्वाणाधिगमः । समज्ञानानां समविमुक्तीनां समविमु[7]क्तिज्ञानदर्शनानां भगवन् निर्वाणाधिगमः । तस्माद्भगवन् निर्वाणधातुरेकरसः समरस इत्युच्यते । यदुत विद्याविमुक्तिरसेनेति ।

जिनगर्भव्यवस्थानमित्येवं दशधोदितम्[8] ।
तत्क्लेशकोशगर्भत्वं पुनर्ज्ञेयं निदर्शनैः ॥ ९५ ॥

इत्येतदपरान्तकोटिसमध्रुवधर्मता[9]संविद्यमानतामधिकृत्य दशविधेनार्थेन तथागत[10]गर्भव्यवस्थानमुक्तम् । पुनरनादिसांनिध्यासंबद्ध[11]स्वभावक्लेशकोशतामनादिसांनिध्यसंबद्ध[12]स्वभावशुभधर्मतां[13] चाधिकृत्य नवभिरुदाहरणैरपर्यन्तक्लेशकोशकोटिगूढस्तथागत[14]गर्भ इति यथासूत्रमनुगन्तव्यम् । नवोदाहरणानि कतमानि ।

बुद्धः कुपद्मे मधु मक्षिकासु[15]
तुषेसु साराण्य[16]शुचौ सुवर्णम् ।

1. B om. *tva*.
2. T om. *prajñā*.
3. °*vinirmukti*°, B.
4. T om. *dhātor*.
5. From the *Āryaśrīmālāsūtra*.
6. B om. *sama*.
7. B om. *mu*.
8. *daśavidho*°, B.
9. B om. *tā*.
10. A om. *gata*.
11. *sāṁnidhyasambaddha*°, B; T as in text; C not clear.
12. A om. *sambaddha*.
13. *śubhakarmatāṁ*, B.
14. A om. *gata*.
15. B om. *su*.
16. *sārany*, B.

निधिः क्षितावल्पफलेऽङ्कुरादि
प्रक्लिन्नवस्त्रेषु जिनात्मभावः ॥ ९६ ॥
जघन्यनारीजठरे नृपत्वं
यथा भवेन्मृत्सु च रत्नबिम्बम्[1] ।
आगन्तुकक्लेशमलावृतेषु
सत्त्वेषु तद्वत् स्थित एष धातुः ॥ ९७ ॥

पद्मप्राणितुषाशु(33*a*)चिक्षितिफलत्वक्पूतिवस्त्रावर-
स्त्रीदुःख[2]ज्वलनाभितप्तपृथिवीधातुप्रकाशा मलाः ।
बुद्धक्षौद्रसुसारकाञ्चननिधिन्यग्रोधरत्नाकृति-
द्वीपाग्राधिपरत्नबिम्बविमलप्रख्यः[3] स धातुः परः ॥ ९८ ॥

कुत्सितपद्मकोशसदृशाः क्लेशाः । बुद्धवत्तथागतधातुरिति ।

यथा विवर्णाम्बुज[4]गर्भवेष्टितं
तथागतं दीप्तसहस्रलक्षणम् ।
नरः समीक्ष्यामलदिव्यलोचनो
विमोचयेदम्बुजपत्त्रकोशतः ॥ ९९ ॥
विलोक्य तद्वत् सुगतः स्वधर्मता-
मवीचिसंस्थेष्वपि बुद्धचक्षुषा ।
विमोचयत्यावरणादनावृतो
ऽपरान्तकोटिस्थितकः कृपात्मकः ॥ १०० ॥

यद्वत् स्याद्विजुगुप्सितं जलरुहं संमिञ्जि(xvI*a*)तं दिव्यदृक्
तद्गर्भस्थितमभ्युदीक्ष्य सुगतं पत्त्राणि संछेदयेत् ।

1. *suvarṇabimbaṁ*, B.
2. *strīrupa*°, A; *striduśva*° (for °*kha* ?), B; *sdug-bsṅal..bud-med*, T.
3. B om. *ratna* and *vi*.
4. *suvārṇāmbuja*°, B; *mdog-ṅan padma*, T.



रागद्वेष[1]मलादिकोशनिवृतं संबुद्धगर्भं जगत्
कारुण्यादवलोक्य तन्निवरणं निर्हन्ति[2] तद्वन्मुनिः ॥ १०१ ॥

क्षुद्रप्राणकसदृशाः क्लेशाः । क्षौद्रवत्तथागतधातुरिति ।

यथा मधु प्राणिगणोपगूढं
विलोक्य विद्वान् पुरुषस्तदर्थी ।
समन्ततः प्राणिगणस्य तस्मा-
दुपायतोऽपक्रमणं प्रकुर्यात् ॥ १०२ ॥
सर्वज्ञचक्षुर्विदितं महर्षि-
र्मधूपमं धातुमिमं विलोक्य ।
तदावृतीनां भ्रमरोपमाना-
मश्लेषमात्यन्तिकमादधाति ॥ १०३ ॥

यद्वत् प्राणिसहस्रकोटिनियुतैर्मध्वावृतं स्यान्नरो
मध्वर्थी विनिहत्य तान्मधुकरान्मध्वा यथाकामतः ।
कुर्यात्कार्यम[3]नास्रवं मधुनिभं ज्ञानं तथा देहिषु
क्लेशाः क्षुद्रनिभा[4] जिनः पुरुषवत् तद्घातने कोविदः ॥१०४॥

बहिस्तुषसदृशाः क्लेशाः[5] । अन्तःसारवत्तथा(33*b*)गतधातुरिति ।

धान्येषु सारं तुषसंप्रयुक्तं
नृणां न य[द्व]त्परिभोगमेति ।
भवन्ति येऽन्नादिभिरर्थिनस्तु
ते तत्तुषेभ्यः[6] परिमोचयन्ति ॥ १०५ ॥

1. '*rāgakleśa*', C; the better reading perhaps.
2. *nirharanti*, B, against the metre.
3. *kuryāt tatvam*, A and B (reading doubtful in both); *bya byed-pa*, T.
4. *kṣudranibhāḥ*, B.
5. B om. *kleśāḥ*.
6. *taṁ tuṣebhyaḥ*, B.

सत्त्वेष्वपि क्लेशमलोपसृष्ट–
मेवं न तावत्कुरुते जिनत्वम् ।
संबुद्धकार्यं त्रिभवे न याव–
द्विमुच्यते क्लेशमलोपसर्गात् ॥ १०६ ॥

यद्वत् कङ्गुकशालिकोद्रवयवव्रीहिष्वमुक्तं तुषात्
सारं खाड्य[1]सुसंस्कृतं न भवति स्वादूपभोज्यं नृणाम् ॥
तद्वत् क्लेशतुंषादनिःसृतवपुः सत्त्वेषु धर्मेश्वरो
धर्मप्रीतिरसप्रदो न भवति क्लेशक्षुधार्ते जने ॥ १०७ ।

अशुचिसंकार[2]धानसदृशाः क्लेशाः । सुवर्णवत्तथागतधातुरिति ।

यथा सुवर्णं व्रजतो नरस्य
च्युतं भवेत्संकरपूतिधाने ।
बहूनि तद्वर्षशतानि तस्मिन्
तथैव तिष्ठेदविनाशधर्मि ॥ १०८ ॥

तद्देवता दिव्यविशुद्धचक्षु–
र्विलोक्य तत्र प्रवदेन्नरस्य ।
सुवर्णमस्मिन्नवमग्ररत्नं
विशोध्य रत्नेन कुरुष्व कार्यम् ॥ १०९ ॥

दृष्ट्वा मुनिः सत्त्वगुणं तथैव
क्लेशेष्वमेध्यप्रतिमेषु मग्नम् ।

1. So B; *khyādyam asaṁskṛtam*, A; *gra-ma-can legs-par ma-grub(=śūky asusaṁskṛtam)*, T. *Khāḍin* is not recorded, but must mean 'husked' and is presumably related to *khaḍa*, known to the dictionaries in the sense of *laghutṛṇa*, and to Hindi *khaḍ* or *khar*, 'paddy straw', 'thatching grass'.

2. Note that the MSS. have *saṁkāra* here, as in Pali, but *saṁkara* in the verses.



तत्क्लेश[1]पङ्कव्यवदानहेतो–
र्धर्माम्बुवर्षं व्यसृजत् प्रजासु ॥ ११० ॥

यद्वत् संकर[2]पूतिधानपतितं चामीकरं देवता
दृष्ट्वा दृश्यतमं नृणामुपदिशेत् संशोधनार्थं मलात् ।
तद्वत् क्लेशमहाशुचिप्रपतितं संबुद्धरत्नं जिनः
सत्त्वेषु व्यवलोक्य धर्ममदिश[त्त]च्छुद्धये देहिनाम् ॥१११॥

पृथिवीतलसदृशाः क्लेशाः । रत्ननिधान[3]वत्तथागतधातुरिति ।

यथा दरिद्रस्य नरस्य वेश्म–
न्यन्तः पृथिव्यां निधिरक्षयः स्यात् ।
विद्यान्न चैनं स नरो न चास्मि–
न्नेषोऽहमस्मीति वदेन्निधिस्तम् ॥ ११२ ॥

तद्वन्मनोऽन्तर्गतमप्य[4] (34*a*) चिन्त्य–
मक्षय्यधर्मामलरत्नकोशम् ।
अबुध्यमानानुभवत्यजस्रं
दारिद्र्यदुःखं बहुधा प्रजेयम् ॥ ११३ ॥

यद्वद्रत्ननिधिर्दरिद्रभवनाभ्यन्तर्गतः स्यान्नरं
न ब्रूयादहमस्मि रत्ननिधिरित्येवं न विद्यान्नरः ।
तद्वद्धर्मनिधिर्मनोगृहगतः सत्त्वा दरिद्रोपमा–
स्तेषां तत्प्रतिलम्भकारणमृषिर्लोके समुत्पद्यते ॥ ११४ ॥

त्वक्कोशसदृशाः क्लेशाः । बीजाङ्कुरवत्तथागतधातुरिति ।

यथाम्रतालादिफले द्रुमाणां
बीजाङ्कुरः[5] सन्नविनाशधर्मी ।

1. *takleśa°*, B.
2. B om. *ra*.
3. B om. *na*.
4. B om. *apy*.
5. *bīje ṅkuraḥ*, B.

उप्तः[1] पृथिव्यां सलिलादियोगात्
क्रमादुपैति द्रुमराजभावम् ॥ ११५ ॥
सत्त्वेष्वविद्या (xvi*b*) दिफलत्वगन्तः–
कोशावनद्धः शुभधर्मधातुः ।
उपैति तत्तत्कुशलं प्रतीत्य
क्रमेण तद्वन्मुनिराजभावम् ॥ ११६ ॥

अम्ब्वादित्यगभस्तिवायुपृथिवीकालाम्बरप्रत्ययै–
र्यद्वत् तालफलाम्रकोशविवरादुत्पद्यते पादपः ।
सत्त्वक्लेशफलत्वगन्तरगतः संबुद्धबीजाङ्कुर–
स्तद्वद्वृद्धिमुपैति धर्मविटपस्तैस्तैः शुभप्रत्ययैः ॥ ११७ ॥

पूतिवस्त्रसदृशाः क्लेशाः । रत्नविग्रहवत्तथागतधातुरिति ।

बिम्बं यथा रत्नम[3]यं जिनस्य
दुर्गन्धपूत्यम्बरसंनिरुद्धम् ।
दृष्ट्वोज्झितं वर्त्मनि देवतास्य
मुक्त्यै वदेदध्वगमेतमर्थम् ॥ ११८ ॥
नानाविधक्लेशमलोपगूढ–
मसङ्गचक्षुः सुगतात्मभावम् ।
विलोक्य तिर्यक्ष्वपि तद्विमुक्तिं
प्रत्यभ्युपायं विदधाति तद्वत् ॥ ११९ ॥

यद्वद्रत्नमयं तथागतवपुर्दुर्गन्धवस्त्रावृतं
वर्त्मन्युज्झितमेक्ष्य[4] दिव्यनयनो मुक्त्यै नृणां दर्शयेत् ।

1. e.c.; *uptam*, A and B.
2. B om. *viṣaya*.
3. B om. *ma*.
4. *ikṣya*, B.



तद्वत् क्लेशविपूतिवस्त्रनिवृतं संसारवर्त्मोज्झितं
ति (34*b*) र्यक्षु व्यवलोक्य धातुमवदद्धर्मं विमुक्त्यै जिनः ॥१२०॥

आपन्नसत्त्वनारी[1]सदृशाः क्लेशाः । कललमहाभूतगतचक्रवर्तिवत्तथागतधातुरिति ।

नारी यथा काचिदनाथभूता
वसेदनाथावसथे विरूपा ।
गर्भेण राजश्रियमुद्वहन्ती[2]
न सावबुध्येत नृपं स्वकुक्षौ ॥ १२१ ॥
अनाथशालेव भवोपपत्ति–
रन्तर्वतीस्त्रीवदशुद्धसत्त्वाः ।
तद्गर्भवत्तेष्वमलः स धातु–
र्भवन्ति यस्मिन्सति ते सनाथाः ॥ १२२ ॥

यद्वत् स्त्री मलिनाम्बरावृततनुर्बीभत्सरूपान्विता
विन्देद्दुःख[3]मनाथवेश्मनि परं गर्भान्तरस्थे नृपे ।
तद्वत् क्लेशवशादशान्तमनसो दुःखालयस्था जनाः
सन्नाथेषु च सत्स्वनाथमतयः स्वात्मा[4]न्तरस्थेष्वपि ॥ १२३ ॥

मृत्पङ्कलेपसदृशाः क्लेशाः । कनकबिम्बवत्त[5]थागतधातुरिति ।

हेम्नो यथान्तःक्वथितस्य पूर्णं
बिम्बं बहिर्मृन्मयमेक्ष्य[6] शान्तम् ।

1. B om. *nārī*.
2. Cf. *Buddhac.*, i, 5, in my translation.
3. *dukham*, B.
4. B om. *tmā*.
5. B om. *vat*.
6. *ikṣya*, B.

अन्तर्विशुद्ध्यै कनकस्य तज्ज्ञः
संचोदयेदावरणं बहिर्धा ॥ १२४ ॥
प्रभास्वरत्वं प्रकृतेर्मलाना-
मागन्तुकत्वं च सदावलोक्य ।
रत्नाकराभं जगदग्रबोधि[1]-
र्विशोधयत्यावरणेभ्य एवम् ॥ १२५ ॥

यद्वन्निर्मलदीप्तकाञ्चनमयं बिम्बं मृदन्तर्गतं
स्याच्छान्तं[2] तदवेत्य रत्नकुशलः संचोदयेन्मृत्तिकाम् ।
तद्वच्छान्तमवेत्य शुद्धकनकप्रख्यं[3] मनः सर्ववि-
द्धर्माख्याननयप्रहार[4]विधितः संचोदयत्यावृतिम् ॥ १२६ ॥

उदाहरणानां पिण्डार्थः ।

अम्बुजभ्रमरप्राणितुषोच्चारक्षितिष्वथ ।
फलत्वक्पूतिवस्त्रस्त्रीगर्भमृत्कोशकेष्व[5]पि ॥ १२७ ॥
बुद्धवन्मधुवत्सारसुवर्णनिधि[6]वृक्षवत् ।
रत्नविग्रहवच्चक्रवर्तिवद्धेमबिम्ब(35*a*)वत् ॥ १२८ ॥
सत्त्वधातोरसंबद्धं क्लेशकोशेष्वनादिषु ।
चित्तप्रकृतिवैमल्यमनादिमदुदाहृतम् ॥ १२९ ॥

समासतोऽनेन तथागतगर्भसूत्रोदाहरणनिर्देशेन कृत्स्नस्य सत्त्वधातोरनादिचित्तसंक्लेशधर्मागन्तुकत्वमनादिचित्तव्यवदानधर्म[7]सहजाविनिर्भागता च

1. *agrabuddhir*, A; but *byaṅ-chub mchog*, T, which supports B; C is ambiguous.
2. *śāntam*, 'cooled down'.
3. °*śuddhakañcanaka*°, B.
4. °*prāhāra*°, B. Cf. *Buddhac.*, i, 74; the phrase here shows that *tāḍa* in that passage means 'blow'.
5. *pūtigarbhastrīgarbhamṛtkopakeṣv*, B.
6. B om. *dhi*.
7. B om. *dharma*.



परिदीपिता । तत उच्यते । चित्तसंक्लेशात् सत्त्वाः संक्लिश्यन्ते[1] चित्तव्यवदानाद्विशुध्यन्त इति । तत्र कतमश्चित्तसंक्लेशो यमधिकृत्य नवधा पद्मकोशादिदृष्टान्तदेशना ।

रागद्विड्मोहतत्तीव्रपर्यवस्थान(XVII*a*)वासनाः ।
दृङ्मार्गभावनाशुद्धशुद्धभूमिगता मलाः ॥ १३० ॥
पद्मकोशादिदृष्टान्तैर्नवधा संप्रकाशिताः ।
अपर्यन्तोप[2]संक्लेशकोशकोट्यस्तु भेदतः ॥ १३१ ॥

समासत इमे नव क्लेशाः प्रकृतिपरिशुद्धेऽपि तथागतधातौ पद्मकोशादय इव बुद्धबिम्बादिषु सदागन्तुकतया संविद्यन्ते । कतमे नव । तद्यथा रागानुशयलक्षणः क्लेशः । द्वेषानुशयलक्षणः । मोहानुशयलक्षणः । तीव्ररागद्वेषमोहपर्यवस्थानलक्षणः । अविद्यावासभूमिसंगृहीतः । दर्शनप्रहातव्यः । भावनाप्रहातव्यः[3] । अशुद्धभूमिगतः । शुद्धभूमिगतश्च । तत्र ये लौकिकवीतरागसान्तानिकाः क्लेशा आनिञ्ज्य[4]संस्कारोपचयहेतवो रूपारूप्य[5]धातुनिर्वर्तका लोकोत्तरज्ञानवध्यास्त उच्यन्ते रागद्वेषमोहानुशयलक्षणा इति । ये रागादिचरितसत्त्वसान्तानिकाः पुण्यापुण्यसंस्कारोपचयहेतवः केवलकामधातुनिर्वर्तका अशुभादिभावज्ञानवध्यास्त उच्यन्ते तीव्रराग[6]द्वे(35*b*)षमोहपर्यवस्थानलक्षणा इति । येऽर्हत्सान्तानिका अनास्रवकर्मप्रवृत्तिहेतवो विमलमनोमयात्मभावनिर्वर्तकास्तथागतबोधिज्ञानवध्यास्त उच्यन्तेऽविद्यावासभूमिसंगृहीता इति । द्विविधः शैक्षः पृथग्जन आर्यश्च । तत्र ये पृथग्जनशैक्षसांतानिकाः प्रथमलोकोत्तरधर्मदर्श[7]नज्ञानवध्यास्त उच्यन्ते दर्शनप्रहातव्या

1. °*saṁkletsatvās saṁklisyante*, B. Neither C nor O identify the quotation, but the former may imply that it comes from the *Tathāgatagarbhasūtra*, for which see *Śikṣāsamuccaya* (ed. Bendall), pp. 368 and 407, note on 171, 13.
2. *aparyantopisaṁ*°, B.
3. B om. *bhāvanāprahātavyaḥ*.
4. °*rāgaśāṁtānikāyāḥ/āniñjya*°, B.
5. *rūpyārūpya*, B.
6. B om. *ga*.
7. *sa daṅ-po ḥjig-rten-las ḥdas-paḥi* (*prathamabhūmilokottara*°), T. B om. *dharma*.

इति । य आर्यपुद्गलशैक्षसान्तानिका यथादृष्टलोकोत्तरधर्मभावनाज्ञानवध्यास्त उच्यन्ते भावनाप्रहातव्या इति । येऽनिष्ठागतबोधिसत्त्वसान्तानिकाः सप्तविधज्ञानभूमिविपक्षा अष्टम्यादिभूमित्रयभावनाज्ञानवध्यास्त उच्यन्तेऽशुद्धभूमिगता इति । ये निष्ठागतबोधिसत्त्वसान्तानिका अष्टम्यादिभूमित्रयभावनाज्ञानविपक्षा वज्रोपमसमाधिज्ञानवध्यास्त उच्यन्ते शुद्धभूमिगता इति । एते[1]

नव रागादयः क्लेशाः संक्षेपेण यथाक्रमम् ।
नवभिः पद्मकोशादिदृष्टान्तैः संप्रकाशिताः ॥ १३२ ॥

विस्तरेण पुनरेत एव चतुरशीतिसहस्रप्रकारभेदेन[2] तथागतज्ञानवदपर्यन्ता भवन्ति यैरपर्यन्तक्लेशकोशकोटिगूढस्तथागतगर्भ उच्यते ।

बालानामर्हतामेभिः शैक्षाणां धीमतां क्रमात् ।
मलैश्चतुर्भिरेकेन द्वाभ्यां द्वाभ्यामशुद्धता ॥ १३३ ॥

यदुक्तं भगवता[3] । सर्वसत्त्वास्तथागतगर्भ इति । तत्र सर्वसत्त्वाः संक्षेपेणोच्यन्ते चतुर्विधास्तद्यथा पृथग्जना अर्हन्तः शैक्षा बोधिसत्त्वाश्चेति । तत्रैषामनास्रवे धातौ यथाक्रमं चतुर्भिरेकेन द्वाभ्यां द्वाभ्यां च क्लेशमलाभ्यामशुद्धिः (36*a*)परिदीपिता[4] ।

कथं पुनरिमे नव रागादयः क्लेशाः पद्मकोशादिसदृशा वेदितव्याः । कथं च तथागतधातोर्बुद्धबिम्बादिसाधर्म्यमनुगन्तव्यमिति ।

तत्पद्मं मृदि संभूतं पुरा भूत्वा मनोरमम् ।
अरम्यमभवत् पश्चाद्यथा रागरतिस्तथा ॥ १३४ ॥
भ्रमराः प्राणिनो यद्वद्दशन्ति कुपिता भृशम् ।
दुःखं ज(x'VII*b*)नयति द्वेषो जायमानस्तथा हृदि ॥ १३५ ॥

1. It is doubtful if this verse is a *kārikā* at all; C treats it as prose, and *cd* is practically identical with 131*cd*. I have excluded *ete* from the verse for metrical reasons, T showing both *ete* and *nava*.
2. *rab-tu dbye-bas* (*prabhedena*), T.
3. C omits this quotation.
4. B om. *dī*.



शाल्यादीनां यथा सारमवच्छन्नं बहिस्तुषैः ।
मोहाण्डकोशसंछन्न[1]मेवं सारार्थदर्शनम् ॥ १३६ ॥
प्रतिकूलं यथामेध्यमेवं कामा विरागिणाम्[2] ।
कामसेवानिमित्तत्वात् पर्युत्थानान्यमेध्यवत् ॥ १३७ ॥
वसुधान्तरितं यद्वदज्ञानान्नाप्नुयुर्निधिम् ।
स्वयंभूत्वं तथाविद्यावासभूम्यावृता जनाः ॥ १३८ ॥
यथा बीजत्वगुच्छित्तिरङ्कुरादिक्रमोदयात् ।
तथा दर्शनहेयानां व्यावृत्तिस्तत्त्वदर्शनात् ॥ १३९ ॥
हतसत्कायसाराणामार्यमार्गानुषङ्गतः ।
भावनाज्ञानहेयानां पूतिवस्त्रनिदर्शनम् ॥ १४० ॥
गर्भकोशमलप्रख्याः सप्तभूमिगता मलाः ।
विकोशगर्भवज्ज्ञानमविकल्पं विपाकवत् ॥ १४१ ॥
मृत्पङ्कलेपवज्ज्ञेयास्त्रिभूम्यनुगता मलाः ।
वज्रोपमसमाधानज्ञानवध्या महात्मनाम् ॥ १४२ ॥
एवं पद्मादिभिस्तुल्या नव रागादयो मलाः ।
धातोर्बुद्धादिसाधर्म्यं स्वभावत्रयसंग्रहात् ॥ १४३ ॥

त्रिविधं स्वभावमधिकृत्य चित्तव्यवदानहेतोस्तथागतगर्भस्य नवधा बुद्धबिम्बादिसाधर्म्यमनुगन्तव्यम् । त्रिविधः स्वभावः कतमः ।

स्वभावो धर्मकायोऽस्य तथता गोत्रमित्यपि ।
(36*b*)त्रिभिरेकेन स ज्ञेयः[3] पञ्चभिश्च निदर्शनैः॥१४४॥

त्रिभिर्बुद्धबिम्बमधुसारदृष्टान्तैर्धर्मकायस्वभावः स धातुरवगन्तव्यः । एकेन सुवर्णदृष्टान्तेन तथतास्वभावः । पञ्चभिर्निधितरुरत्नविग्रहचक्र-

1. °*saśchannam*, B.
2. T takes *kāmāvirāgiṇām* as one word; C is not clear, but may have divided as in the text.
3. B om. the visarga.

वर्तिकनकबिम्बदृष्टान्तैस्त्रिविधबुद्ध[1]कायोत्पत्तिगोत्रस्वभाव इति । तत्र धर्मकायः कतमः

धर्मकायो द्विधा[2] ज्ञेयो धर्मधातुः सुनिर्मलः ।
तन्निष्यन्दश्च गाम्भीर्यवैचित्र्यनयदेशना ॥ १४५ ॥

द्विविधो बुद्धानां धर्मकायो[3]ऽनुगन्तव्यः । सुविशुद्धश्च धर्मधातोरविकल्पज्ञानगोचरविषयः । स च तथागतानां प्रत्यात्ममधिगमधर्ममधिकृत्य वेदितव्यः । तत्प्राप्तिहेतुश्च सुविशुद्धधर्मधातुनिष्यन्दो यथावैनयिक[4]परसत्त्वेषु विज्ञप्तिप्रभवः । स च देशनाधर्ममधिकृत्य वेदितव्यः । देशना पुनर्द्विविधा सूक्ष्मौदारिकधर्मव्यवस्थाननयभेदात् । यदुत गम्भीरबोधिसत्त्वपिटकधर्मव्यवस्थान[5]नयदेशना च परमार्थसत्यमधिकृत्य विचित्रसूत्रगेयव्याकरणगाथोदाननिदानादिविविध[6]धर्मव्यवस्थाननयदेशना च संवृतिसत्यमधिकृत्य ।

लोकोत्तरत्वाल्लोकेऽस्य दृष्टान्तानुपलब्धितः ।
धातोस्तथागतेनैव सादृश्यमुपपादितम् ॥ १४६ ॥
मध्वेक[7]रसवत् सूक्ष्मगम्भीरनयदेशना ।
नानाण्डसारवज्ज्ञेया विचित्रनयदेशना ॥ १४७ ॥

इत्येवमेभिस्त्रि[8]भिर्बुद्धबिम्बमधुसारदृष्टान्तैस्तथागतधर्मकायेन निरवशेषसत्त्व[9]धातुपरिस्फरणार्थमधिकृत्य तथागतस्येमे गर्भाः सर्वसत्त्वा इ(37*a*)ति परिदीपितम् । न हि स कश्चित्सत्त्वः सत्त्वधातौ संविद्यते यस्तथागतधर्मकायाद्बहिराकाशधातोरिव रूपम् । एवं ह्याह ।

1. B repeats *buddha*.
2. *dvividho*, B.
3. *dhamakāyo*, B.
4. *yathāvainainayika*°, A.
5. T om. *vyavasthāna*.
6. B om. one *dha*.
7. B om. *ka*.
8. *tṛbhir*, B.
9. *niraśeṣadharmadhātu*°, B; A, T and C as in text.



यथाम्बरं सर्वगतं सदा मतं
तथैव तत्सर्वगतं सदा मतम् ।
यथाम्बरं रूपगतेषु सर्वगं
तथैव त[1]त्सत्त्वगणेषु सर्वगमिति ॥

प्रकृतेरविकारित्वात् कल्याणत्वाद्विशुद्धितः ।
हेममण्डलकौपम्यं तथतायामुदाहृतम् ॥ १४८ ॥

यच्चित्तमपर्यन्तक्लेशदुःखधर्मा[2]नुगतमपि प्रकृतिप्रभास्वरतया विकारानुदाहृतेरतः[3] कल्याणसुवर्णवेदन[4]न्यथाभावार्थेन तथतेत्युच्यते । स च सर्वेषामपि मिथ्यात्वनियतसंतानानां सत्त्वानां प्रकृतिनिर्विशिष्टानां सर्वागन्तुकमलविशुद्धिमागतस्तथागत[5] इति संख्यां गच्छति । एवमेकेन सुवर्णदृष्टान्तेन तथताव्यतिभेदार्थमधिकृत्य तथागतस्तथतैषां गर्भः सर्वसत्त्वानामिति परिदीपितम् । चित्तप्रकृतिविशुद्ध्यद्वयधर्मतामुपादाय यथोक्तं भगवता । तत्र मञ्जुश्रीस्तथागत आत्मोपादानमूलपरिज्ञातावी[6] । आत्मविशुद्ध्या सर्वसत्त्वविशुद्धिमनुगतः । या चात्मविशुद्धिर्या च सत्त्वविशुद्धिरद्वयैषाद्वैधीकारो ति[7] । एवं ह्याह ।

सर्वेषामविशिष्टापि तथता शुद्धिमागता ।
तथागतत्वं तस्माच्च तद्गर्भाः सर्वदेहिन इति[8] ॥

गोत्रं तद्द्विविधं[9] ज्ञेयं निधानफलवृक्षवत् ।
अनादिप्रकृतिस्थं च समुदानीतमुत्तरम् ॥ १४९ ॥

1. *tathaiva tsarva*, B. This verse recurs at *Mahāyānasūtrālaṁkāra*, ix, 15, which reads *rūpagaṇeṣu* in *c*.
2. T om. *dharma*, and C the whole sentence. A's f.xvii ends with *yac citta*.
3. *vikāranudāhṛteḥ*, B; *rnam-par ḥgyur-ba-la mi-ston-pa*, T.
4. B om. *an*.
5. B repeats *Tathāgata*.
6. T oddly takes the ending *-āvī* of *parijñātāvī* to the root *av* in the meaning 'protect'. C does not give the name of the sūtra (*Jñānālokālaṁkārasūtra*, O).
7. So B, which may reproduce a faulty saṁdhi of the original; but *kāreti* is perhaps preferable.
8. This verse recurs at *Mahāyānasūtrālaṁkāra*, ix, 37.
9. *ta dvividhaṁ*, B; *rigs de rnam-gñis*, T.

बुद्धकायत्रयावाप्तिरस्माद्गोत्रद्वयान्मता[1] ।
प्रथमा[2]ऽप्रथमः कायो द्विती(37b)याद्द्वौ तु पश्चिमौ ॥१५०॥
रत्नविग्रहवज्ज्ञेयः कायः स्वाभाविकः शुभः ।
अकृत्रिमत्वात् प्रकृतेर्गुणरत्नाश्रयत्वतः ॥ १५१ ॥
महाधर्माधिराजत्वात् साम्भोगश्चक्रवर्तिवत् ।
प्रतिबिम्बस्वभावत्वान्निर्माणं[3] हेमबिम्बवत् ॥ १५२ ॥

इत्येवमेभिरवशिष्टैः पञ्चभिर्नि[4]धितरुरत्नविग्रहचक्रवर्तिकनकबिम्बदृष्टान्तैस्त्रि[5]विधबुद्धकायोत्पत्तिगोत्रस्वभावार्थमधिकृत्य तथागतधातुरेषां गर्भः सर्वसत्त्वानामिति परिदीपितम् । त्रिविधबुद्धकायप्रभावितत्वं हि तथागतत्वम् । अतस्तत्प्राप्तये हेतुस्तथागतधातुरिति । हेत्वर्थोऽत्र धात्वर्थः । यत आह[6] । तत्र च सत्त्वे सत्त्वे तथागतधातुरुत्पन्नो गर्भगतः संविद्यते न च ते सत्त्वा बुध्यन्त इति । एवं ह्याह ।

अनादिकालिको धातुः सर्वधर्मसमाश्रयः ।
तस्मिन् सति गतिः सर्वा निर्वाणाधिगमोऽपि च[7] ॥

तत्र कथमनादिकालिकः । यत्तथागतगर्भमेवाधिकृत्य भगवता[8] पूर्वकोटिर्न प्रज्ञायत इति देशितं प्रज्ञप्तम् । धातुरिति । यदाह[9] । योऽयं भगवं-

1. e.c.; last two syllables uncertain. B seems to have °*dvayāt satā* (or *punā* ?), while T only shows *yaṅ*, perhaps for °*dvayād api*.
2. B om. *mā*.
3. *nimāṇa*, B.
4. *ity evam aviśiṣṭai pañcabhi*, B; *de-ltar..lhag-ma lṅa-bo ḥdi-dag-gis*, T; C as in text.
5. *dṛṣṭāntai tri* B.
6. C omits this quotation, and O has not identified it.
7. For this verse from the *Abhidharmamahāyānasūtra* see Lamotte, *Mélanges chinois et bouddhiques*, III, 171 and *La Somme du Grand Véhicule d'Asaṅga(Mahāyānasaṁgraha)*, II, p. 12. Note the difference of intepretation at the latter passage, where the verse is applied to the *ālayavijñāna*.
8. T om. *Bhagavatā*, but C has it.
9. This and the next three quotations are from the *Ārya-śrīmālāsūtra*.



स्तथागतगर्भो लोकोत्तरगर्भः प्रकृतिपरिशुद्धगर्भ इति । सर्वधर्मसमाश्रय इति[1] । यदाह । तस्माद्भगवंस्तथागतगर्भो निश्रय आधारः प्रतिष्ठा संबद्धानामविनिर्भागानाममुक्तज्ञानानामसंस्कृतानां धर्माणाम् । असंबद्धानामपि भगवन् विनिर्भागधर्माणां[2] मुक्तज्ञानानां संस्कृतानां धर्माणां निश्रय आधारः प्रतिष्ठा तथागतगर्भ इति । (38a)तस्मिन् सति गतिः सर्वेति । यदाह । सति भगवंस्तथागतगर्भे संसार इति परिकल्पमस्य वचनायेति । निर्वाणाधिगमोऽपि चेति । यदाह । तथागत[3]गर्भश्चेद् भगवन्न स्यान्न स्याद्दुःखेऽपि निर्विन्न[4] निर्वाणेच्छा प्रार्थना प्रणिधिर्वेति विस्तरः ।

स खल्वेष तथागतगर्भो धर्मकायाविप्रलम्भ[5]स्तथतासंभिन्नलक्षणो नियतगोत्रस्वभावः सर्वदा च सर्वत्र च निरवशेषयोगेन सत्त्वधाताविति द्रष्टव्यं[6] धर्मतां प्रमाणीकृत्य । यथोक्तम् । एषा[7] कुलपुत्र धर्माणां धर्मता । उत्पादाद्वा तथागतानामनुत्पादाद्वा सदैवैते सत्त्वास्तथागतगर्भा इति । यैव चासौ धर्मता सैवात्र युक्तिर्योग उपायः पर्यायः । एवमेव तत्स्यात्[8] । अन्यथा नैव[9] तत्स्यादिति । सर्वत्र धर्मतैव प्रतिशरणम् । धर्मतैव युक्तिश्चित्तनिध्यापनाय चित्तसंज्ञापनाय । सा न चिन्तयितव्या न विकल्पयितव्याधिमोक्तव्येति[10] ।

1. B repeats *sarvadharmasamāśraya iti.*
2. *rnam-par dbye-ba daṅ bcas-paḥi chos* (*savinirbhāga..*), T.
3. *Tathāgarbhaś*, B.
4. B om. *nna*. Cf. i, 40, above.
5. e.c.; *dharmakāyavipralambhas ta tathatā°* , B; *chos-kyi sku-ltar rgya-che-ba de-bzhin-gśegs-pa*, (*dharmakāyavipulas* (?) *Tathāgata°*), T; C has the equivalent of *abhinna* (for *avipralambha*) and of *tathatā*, which corresponds to the text, or perhaps preferably to *dharmakāyāvipralabdhas...*
6. e.c.; °*yogena saṁrvadyatanatija draṣṭavyaṁ*, B; T, which is partly illegible, seems to omit *sattvadhātau*; C shows something like *sattvakāya*.
7. *aśeṣa*, B; *ḥdi*, T.
8. Reading uncertain. *paryāyā eva vai tat syāt*, B. Several syllables are illegible in T, which seems to omit *upāyaḥ paryāyaḥ* and reads *evam eva* (*de-lta-bu kho-nar*). C shows *upāyaḥ*, but omits *paryāyaḥ*.
9. *naivai*, B.
10. T is difficult to read again here, but suggests that something is missing in B to separate *adhimoktavyā* from *vikalpayitavyā* (e.g. *adhimoktavyā tv iti*).

श्रद्धयैवानुगन्तव्यं परमार्थे[1] स्वयंभुवाम् ।
न ह्यचक्षुः प्रभादीप्तमीक्षते सूर्यमण्डलम् ॥ १५३ ॥

समासत इमे चत्वारः पुद्गलास्तथागतगर्भदर्शनं प्रत्यचक्षुष्मन्तो व्यवस्थिताः । कतमे चत्वारः । यदुत पृथग्जनः श्रावकः प्रत्येकबुद्धो नवयानसंप्रस्थितश्च बोधिसत्त्वः । यथोक्तम्[2] । अगोचरोऽयं भगवंस्तथागतगर्भः सत्कायदृष्टिपतितानां विपर्यासाभिरतानां शून्यताविक्षिप्तचित्तानामिति । तत्र सत्कायदृष्टिपतिता उच्यन्ते बालपृथग्जनाः । तथा हि तेऽत्यन्तसास्रवस्कन्धादी (38*b*) न्धर्मानात्मत आत्मीयत[3]श्चोपगम्याहंकारममकाराभिनिविष्टाः सत्कायनिरोधमनास्रवधातुमधिमोक्तुमपि नालम् । कुतः पुनः सर्वज्ञविषयं तथागतगर्भमवभोत्स्यन्त इति । नेदं स्थानं विद्यते । तत्र विपर्यासाभिरता उच्यन्ते श्रावकप्रत्येकबुद्धाः । तत्कस्मात् । तेऽपि हि नित्ये तथागतगर्भे सत्युत्तरिभावयितव्ये तन्नित्यसंज्ञाभावनाविपर्ययेणानित्यसंज्ञाभावनाभिरताः । सुखे तथागतगर्भे सत्युत्तरिभावयितव्ये तत्सुखसंज्ञाभावनाविपर्ययेण दुःखसंज्ञाभावनाभिरताः[4] । आत्मनि तथागतगर्भे सत्युत्तरिभावयितव्ये तदात्मसंज्ञाभावनावि[5]पर्ययेणानात्मसंज्ञाभावनाभिरताः । शुभे तथागतगर्भे सत्युत्तरिभावयितव्ये तच्छुभसंज्ञाभावनाविपर्ययेणाशुभसंज्ञाभावना[6]भिरताः । एवमनेन पर्यायेण सर्वश्रावकप्रत्येकबुद्धानामपि धर्मकायप्राप्तिविधुरमार्गाभिरतत्वादगोचरः स परमनित्यसुखात्मशुभलक्षणो धातुरित्युक्तम् । यथा च स विपर्यासाभिरतानामनित्यदुःखानात्माशुभसंज्ञानामगोचरस्तथा विस्तरेण **महापरिनिर्वाणसूत्रे** भगवता वापीतोयमणिदृष्टान्तेन प्रसाधितः ।

तद्यथापि नाम भिक्षवो ग्रीष्मकाले वर्तमाने सलिलबन्धनं बद्ध्वा स्वैः स्वैर्मण्डनकोपभोगैर्जनाः सलिले क्रीडेयुः । अथ तत्रैको जात्यं वैडूर्यमणिमन्तरुदके

1. *parārthe*, B; *don dam*, T.
2. From the *Āryaśrīmālāsūtra*.
3. e.c.; B om. *ātmīyata*; *bdag daṅ bdag-gi-ba-ñid-du*, T, which possibly represents *ātmato mamatvataś ca*.
4. B misplaces this sentence and inserts marks to correct the error.
5. B om. *vi*.
6. B om. *viparyayeṇāśubhasaṁjñābhāvanā*; T as in text.



स्थापयेत् । ततस्तस्य वैडूर्यस्यार्थे सर्वे ते मण्डनकानि त्य (39*a*) क्त्वा निमज्जेयुः । अथ यत्तत्रास्ति शर्करं कठल्यं वा तत्ते मणिरिति मन्यमाना गृहीत्वा मया लब्धो मणिरित्युत्सृज्योत्सृज्य वापीतीरे स्थित्वा[1] नायं मणिरिति संज्ञां प्रवर्तेयुः । तच्च वाप्युदकं मणिप्रभावेन तत्प्रभेव भ्राजेत । एवं तेषां[2] तदुदकं भ्राजमानं दृष्ट्वाहो मणिरिति गुणसंज्ञा प्रवर्तेत । अथ तत्रैक उपायकुशलो मेधावी मणिं तत्त्वतः प्रतिलभेत । एवमेव भिक्षवो युष्माभिः सर्वमनित्यं सर्वं दुःखं सर्वमनात्मकं सर्वमशुभ (XIX*a*) मिति सर्वग्रहणेन[3] भावितभावितं बहुलीकृतबहुलीकृतं धर्मतत्त्वम[4]जानद्भिस्तत्सर्वं घटितं निरर्थकम् । तस्माद्भिक्षवो वापीशर्करकठल्यव्यवस्थि[5]ता इव मा भूता उपायकुशला यूयं भवत । यद्यद्भिक्षवो युष्माभिः सर्वमनित्यं[6] सर्वं दुःखं सर्वमनात्मकं सर्वमशुभमिति सर्वग्रहणेन भावितभावितं बहुलीकृतबहुलीकृतं तत्र तत्रैव नित्यसुखशुभात्मकानि सन्तीति विस्तरेण परमधर्मतत्त्वव्यवस्थानमारभ्य विपर्यासभूतनिर्देशो यथासूत्रमनुगन्तव्यः ।

तत्र शून्यताविक्षिप्तचित्ता उच्यन्ते[7] नवयान[8]संप्रस्थिता बोधिसत्त्वास्तथागतगर्भशून्यतार्थनयविप्रनष्टाः[9] । ये भावविनाशाय शून्यताविमोक्षमुखमिच्छन्ति सत एव धर्मस्योत्तरकालमुच्छेदो विनाशः परिनिर्वाणमिति । ये वा पुनः शून्यतोपलम्भेन शून्यतां प्रतिसरन्ति शून्यता नाम रूपादिव्यतिरेकेण कश्चिद्भा (39*b*) वोऽस्ति यमधिगमिष्यामो भावयिष्याम इति । तत्र कतमः स तथागतगर्भशून्यतार्थनय[10] उच्यते ।

1. Reading doubtful; *phyuṅ-no/phyuṅ-nas rdziṅ-buḥi ḥgram-du bltas-pa-na*, T, which suggests (*ity*) *unmajjeyuḥ/unmajjya vāpītīre paśyanto* (?, or *dṛṣṭvā*).
2. e.c.; *teṣaṁ teṣāṁ*, B, omitting *evam*; *de-dag de-ltar* (*evam* or *tathā*), T.
3. *savagrahaṇena*, B; *sarvasaṁjñāgrahaṇena*, A; T om. *saṁjñā*.
4. *chos-kyi don ni de-kho-na* (*dharmārthatattvam*?), T.
5. °*vyavasthāpitā*, A.
6. B om. *ḥ sarvam anityam*.
7. *utpadyante*, B.
8. B repeats *yāna*.
9. T om. *artha*. °*nayapranaṣṭāḥ*, B.
10. T om. *sa* and *artha*.

नापनेयमतः किंचिदुपनेयं न किंचन ।
द्रष्टव्यं भूततो भूतं भूतदर्शी विमुच्यते[1] ॥ १५४ ॥
शून्य आगन्तुकैर्धातुः सविनिर्भागलक्षणैः ।
अशून्योऽनुत्तरैर्धर्मैरविनिर्भागलक्षणैः[2] ॥ १५५ ॥

किमनेन परिदीपितम् । यतो न किंचिद[3]पनेयमस्त्यतः प्रकृतिपरिशुद्धात् तथागतधातोः संक्लेशनिमित्तमागन्तु[4]कमलशून्यताप्रकृतित्वादस्य । नाप्यत्र[5] किंचिदुपनेयमस्ति व्यवदाननिमित्तमविनिर्भाग[6]शुद्धधर्मप्रकृतित्वात् । तत उच्यते[7]। शून्यस्तथागतगर्भो विनिर्भागैर्मुक्तज्ञैः सर्वक्लेशकोशैः । अशून्यो गङ्गानदीवालिकाव्यतिवृत्तैरविनिर्भागैरमुक्तज्ञैरचिन्त्यैर्बुद्धधर्मैरिति । एवं यद्यत्र नास्ति तत्तेन शून्यमिति समनुपश्यति । यत्पुनरत्रावशिष्टं भवति तत्सदिहास्तीति यथाभूतं प्रजानाति । समारोपापवादान्तपरिवर्जनादपर्यन्तं शून्यतालक्षणमनेन श्लोकद्वयेन परिदीपितम् । तत्र येषामितः शून्यतार्थनयाद्बहिश्चित्तं विक्षिप्यते विसरति न समाधीयते नैकाग्रीभवति तेन ते शून्यताविक्षिप्तचित्ता उच्यन्ते । न हि परमार्थशून्यताज्ञानमुखमन्तरेण शक्यते[8]ऽविकल्पो धातुरधिगन्तुं साक्षात्कर्तुम् । इदं च संधायोक्तम्[9] । तथागतगर्भज्ञानमेव तथागतानां शून्यताज्ञानम् । तथागतगर्भश्च सर्वश्रावकप्रत्येकबुद्धैरदृष्टपूर्वोऽनधिगतपूर्व इति विस्तरः । स खल्वेष तथागतगर्भो (40*a*)यथा धर्मधातुगर्भस्तथा सत्कायदृष्टिपतितानामगोचर इत्युक्तं दृष्टिप्रतिपक्षत्वाद्धर्मधातोः । यथा धर्मकायो लोकोत्तरधर्म[10]गर्भस्तथा विपर्यासाभिरतानामगोचर इत्युक्तमनित्यादिलोकधर्मप्रतिपक्षेण लोकोत्तरधर्मपरिदीपनात् । यथा प्रकृतिपरिशुद्धधर्मगर्भस्तथा शून्यताविक्षिप्तानामगोचर इत्युक्तमागन्तुकमलशून्यताप्रकृति-

1. It is uncertain if this famous verse is to be taken as a kārikā. For its occurrence in literature see La Vallée Poussin, *Mélanges chinois et bouddhiques*, I, 394.
2. B om. this line and adds it in margin in the same hand.
3. *kaṁcid*, B.
4. °*nimittāyā āgantuka*°, B.
5. *nāpy anyatra*, B.
6. T inserts *dharma* (*chos*) between *avinirbhāga* and *śuddha*.
7. C attributes this quotation to the *Āryaśrīmālāsūtra*.
8. *sa śakyo*, B.
9. C attributes this quotation to the *Āryaśrīmālāsūtra*.
10. T om. *dharma*.



त्वाद्विशुद्धिगुणधर्माणामविनिर्भागलोकोत्तरधर्मकायप्रभावि(XIX*b*)तानामिति । तत्र यदेकनयधर्मधात्वसंभेदज्ञानमुख[1]मागम्य लोकोत्तरधर्म[2]कायप्रकृतिपरिशुद्धिव्यवलोकनमिदमत्र यथाभूतज्ञानदर्शनमभिप्रेतं येन दशभूमिस्थिता बोधिसत्त्वास्तथागतगर्भमीषत्पश्यन्तीत्युक्तम् । एवं ह्याह ।

छिद्राभ्रे नभसीव[3] भास्कर इह त्वं शुद्धबुद्धीक्षणै-
रार्यैरप्यवलोक्यसे न सकलः प्रादेशिकीबुद्धिभिः ।
ज्ञेयानन्तनभस्तलप्रविसृतं ते धर्मकायं तु ते
साकल्येन विलोकयन्ति भगवन्[4] येषामनन्ता मतिरिति ॥

यद्येवमसङ्ग[5]निष्ठाभूमिप्रतिष्ठितानामपि परमार्याणामसर्वविषय एष दुर्दृशो धातुः । तत्किमनेन बालपृथग्जनमारभ्य[6] देशितेनेति । देशनाप्रयोजनसंग्रहे श्लोकौ । एकेन प्रश्नो द्वितीयेन व्याकरणम् ।

शून्यं सर्वं सर्वथा तत्र तत्र
ज्ञेयं मेघस्वप्नमायाकृताभम् ।
इत्युक्त्वैवं बुद्धधातुः[7] पुनः किं
सत्त्वे सत्त्वेऽस्तीति बुद्धैरिहोक्तम् ॥ १५६ ॥
लीनं चित्तं हीनसत्त्वेष्ववज्ञा-
भू( 40*b* )तग्राहो भूतधर्मापवादः ।
आत्मस्नेहश्चाधिकः पञ्च दोषा[8]
येषां तेषां तत्प्रहाणार्थमुक्तम् ॥ १५७ ॥

अस्य खलु श्लोकद्वयस्यार्थः समासेन दशभिः श्लोकैर्वेदितव्यः ।

1. *jñāpanamukham*, A; T om. *jñāna*.
2. B om. *rma*.
3. B om. *bha*; *chidrābhena nabhasīva*, A. C does not give the source of this verse.
4. *Bhagavat*, B.
5. *evam anaṅga*°, B.
6. *byis-pa so-soḥi skye-bo* (*bālapṛthagjanam*), T.
7. *saṅs-rgyas sñin-po* (*buddhagarbhaḥ*), T.
8. *lhag-paḥi skyon lṅa* (*adhikāḥ pañca dosā*), T.

विविक्तं संस्कृतं सर्वप्रकारं भूतकोटिषु ।
क्लेशकर्मविपाकार्थं मेघादिवदुदाहृतम् ॥ १५८ ॥
क्लेशा मेघोपमाः कृत्यक्रिया स्वप्नोपभोगवत् ।
मायानिर्मितवत् स्कन्धा विपाकाः[1] क्लेशकर्मणाम् ॥ १५९ ॥
पूर्वमेवं व्यवस्थाप्य तन्त्रे पुनरिहोत्तरे ।
पञ्चदोषप्रहाणाय धात्वस्तित्वं प्रकाशितम् ॥ १६० ॥
तथा ह्यश्रवणादस्य बोधौ चित्तं न जायते ।
केषांचिन्नीचचित्तानामात्मावज्ञानदोषतः ॥ १६१ ॥
बोधिचित्तोदयेऽप्यस्य श्रेयानस्मीति मन्यतः
बोध्यनुत्पन्नचित्तेषु हीनसंज्ञा प्रवर्तते ॥ १६२ ॥
तस्यैवंमतिनः सम्यग्ज्ञानं नोत्पद्यते ततः ।
अभूतं परिगृह्णाति भूतमर्थं न विन्दते ॥ १६३ ॥
अभूतं सत्त्वदोषास्ते कृत्रिमागन्तुकत्वतः ।
भूतं तद्दोषनैरात्म्यं[2] शुद्धिप्रकृतयो गुणाः ॥ १६४ ॥
गृह्णन् दोषानसद्भूतान् भूतानपवदन् गुणान् ।
मैत्रीं न लभते धीमान् सत्त्वात्मसमदर्शिकाम् ॥ १६५ ॥
तच्छ्रवाज्जायते[3] त्वस्य प्रोत्साहः शास्तृगौरवम् ।
प्रज्ञा ज्ञानं महामैत्री पञ्चधर्मोदयात्ततः ॥ १६६ ॥
निरवज्ञः समप्रेक्षी निर्दोषो गुणवानसौ ।
आत्मसत्त्वसमस्नेहः क्षिप्रमाप्नोति बुद्धताम् ॥ १६७ ॥

इति रत्नगोत्रविभागे महायानोत्तरतन्त्रशास्त्रे तथागतगर्भाधिकारः प्रथमः परिच्छेदः श्लोका[4]र्थसंग्रहव्याख्यानतः समाप्तः ॥१॥

—o—

1. *vipākah*, B.
2. *nairātmya*, A; *tadoṣanairātmya*, B.
3. *tacchraddhāj jāyate tv asya*, B; *ḥdi-ltar de ni thos-pa-las* (*tacchravād evam*, omitting *jāyate*), T; 'hearing the *yathābhūta* nature', C.
4. °*ādhikāra prathama śloka*°, B.

## II

उक्ता समला तथता । निर्मला (41*a*)तथतेदानीं वक्तव्या । तत्र कतमा निर्मला तथता यासौ बुद्धानां भगवतामनास्रवधातौ सर्वाकारमलविगमादाश्रयपरिवृत्तिर्व्यवस्थाप्यते । सा पुनरष्टौ पदार्थानधिकृत्य समासतो वेदितव्या । अष्टौ पदार्थाः कतमे ।

शुद्धिः प्राप्तिर्विसंयोगः स्वपरार्थस्तदाश्रयः ।
गम्भीर्यौदार्यमाहात्म्यं यावत्कालं यथा च तत् ॥ १ ॥

इत्येतेऽष्टौ पदार्था यथासंख्यमनेन श्लोकेन[1] परिदीपिताः । तद्यथा स्वभावार्थो हेत्वर्थः फलार्थः कर्मार्थो योगार्थो वृत्त्यर्थो नित्यार्थोऽचिन्त्यार्थः । तत्र (xx*a*) योऽसौ धातुरविनिर्मुक्तक्लेशकोशस्तथागतगर्भ[2] इत्युक्तो भगवता । तद्विशुद्धिराश्रयपरिवृत्तेः स्वभावो वेदितव्यः । यत आह[3] । यो भगवन् सर्वक्लेशकोशकोटिगूढे तथागतगर्भे निष्काङ्क्षः सर्वक्लेशकोशवि[4]निर्मुक्तेस्तथागतधर्मकायेऽपि स[5] निष्काङ्क्ष इति । द्विविधं ज्ञानं[6] लोकोत्तरमविकल्पं तत्पृष्ठलब्धं[7] च । लौकिकलोकोत्तरज्ञानमाश्रयपरिवृत्तिहेतुः प्राप्तिशब्देन परिदीपितः । प्राप्यतेऽनेनेति[8] प्राप्तिः । तत्फलं द्विविधम् । द्विविधो विसंयोगः क्लेशावरणविसंयोगो ज्ञेयावरणविसंयोगश्च । यथाक्रमं स्वपरार्थसंपादनं कर्म । तदधिष्ठानसमन्वागमो योगः । त्रिभिर्गाम्भीर्यौदार्यमाहात्म्यप्रभावितैर्बुद्धकार्यैर्नित्यमा भवगतेर[9]चिन्त्येन प्रकारे(41*b*)ण वर्तनं वृत्तिरिति । उद्दानम् ।

स्वभावहेतुफलतः कर्मयोगप्रवृत्तितः ।
तन्नि[10]त्याचिन्त्यतश्चैव बुद्धभूमिष्ववस्थितिः ॥ २ ॥

1. A om. *ślokena*.
2. B om. *rbha*.
3. From the *Āryaśrīmālāsūtra*.
4. B om. *vi*.
5. B om. *sa*.
6. *dvividhaṁ kiṁ jñānaṁ*, B.
7. B adds *laukikam* after *tatpṛsthalabdham*. A, T and C omit it, but Obermiller's version of T had it.
8. *anenepti*, B.
9. *ā bhagavater*, B.
10. B om. *tam*.

तत्र स्वभावार्थं हेत्वर्थं चारभ्य बुद्धत्वे तत्प्रा[1]प्त्युपाये च श्लोकः ।

बुद्धत्वं प्रकृतिप्रभास्वरमिति प्रोक्तं यदागन्तुक-
क्लेशज्ञेयघनाभ्रजालपटलच्छन्नं रविव्योमवत् ।
सर्वैर्बुद्धगुणैरुपेतममलैर्नित्यं ध्रुवं शाश्वतं
धर्माणां तदकल्पनप्रविचयज्ञानाश्रयादाप्यते ॥ ३ ॥

अस्य श्लोकस्यार्थः समासेन चतुर्भिः श्लोकैर्वेदितव्यः ।

बुद्धत्वमविनिर्भागशुक्लधर्मप्रभावितम् ।
आदित्याकाशवज्ज्ञानप्रहाणद्वयलक्षणम्[2] ॥ ४ ॥
गङ्गातीररजोऽतीतैर्बुद्धधर्मैः प्रभास्वरैः ।
सर्वै रकृतकैर्युक्तमविनिर्भागवृत्तिभिः ॥ ५ ॥
स्वभावापरिनिष्पत्तिव्यापित्वागन्तुकत्वतः ।
क्लेशज्ञेयावृतिस्तस्मान्मेघवत् समुदाहृता ॥ ६ ॥
द्वयावरणविश्लेषहेतुर्ज्ञानद्वयं पुनः ।
निर्विकल्पं च तत्पृष्ठलब्धं त[3]ज्ज्ञानमिष्यते ॥ ७ ॥

यदुक्तमाश्रयपरिवृत्तेः स्वभावो विशुद्धिरिति तत्र विशुद्धिः समासतो द्विविधा । प्रकृतिविशुद्धिर्वैमल्यविशुद्धिश्च । तत्र प्रकृतिविशुद्धिर्या विमुक्तिर्न च[4] विसंयोगः प्रभास्वरायाश्चित्तप्रकृतेरागन्तुक[5]मलाविसंयोगात् । वैमल्यविशुद्धिर्विमुक्तिर्विसंयोगश्च[6] वार्यादीनामिव रजोजलादिभ्यः प्रभास्वराया[7]श्चित्तप्रकृतेरनवशेषमागन्तुक(42*a*) मलेभ्यो विसंयोगात् । तत्र वैमल्यविशुद्धौ फलार्थमारभ्य द्वौ श्लोकौ ।

1. B om. *tat*; A and T have it.
2. C seems to have read *prahāṇadvaya*.
3. B om. *taj*.
4. *viśuddhir yā viddhir yā vimukti na ca visaṁyogaḥ*, B; T om. *yā*, and A may mean it to be cut out.
5. B om. *ka*.
6. °*viśuddhir vimuktiḥ / sa ca visaṁyogaḥ /*, B; T om. *sa*.
7. B om. *yā*.



ह्रद इव विमलाम्बुः फुल्लपद्मक्रमाढ्यः[1]
सकल इव शशाङ्को राहुवक्त्राद्विमुक्तः[2] ।
रविरिव जलदादिक्लेशनिर्मुक्तरश्मि-
र्विमलगुणयुतत्वाद्भाति मुक्तं तदेव ॥ ८ ॥
मुनिवृषमधुसारहेमरत्न-
प्रवरनिधानमहाफलद्रुमाभम् ।
सुगतविमलरत्नविग्रहाग्र-
क्षितिपतिकाञ्चनबिम्बवज्जिनत्वम् ॥ ९ ॥

अस्य खलु श्लोकद्वयस्यार्थः समासतोऽष्टाभिः श्लोकैर्वेदितव्यः ।

रागाद्यागन्तुकक्लेशशुद्धिरम्बुह्रदादिवत् ।
ज्ञानस्य निर्विकल्पस्य फलमुक्तं समासतः ॥ १० ॥
सर्वाकारवरोपेतबुद्धभावनिदर्शनम् ।
फलं तत्पृष्ठलब्धस्य ज्ञानस्य परिदीपितम् ॥ ११ ॥
स्वच्छाम्बुह्रदवद्रागरजःकालुष्यहानितः ।
विनेयाम्बुरुहध्यानवार्यभिष्यन्दनाच्च तत् ॥ १२ ॥
द्वेषराहुप्रमुक्तत्वा(xx*b*)न्महामैत्रीकृपांशुभिः[3] ।
जगत्स्फरणतः पूर्णविमलेन्दूपमं च तत् ॥ १३ ॥
मोहाभ्रजालनिर्मोक्षाज्जगति ज्ञानरश्मिभिः ।
तमोविधमनात्तच्च बुद्धत्वममलार्कवत् ॥ १४ ॥
अतुल्यतुल्यधर्मत्वात् सद्धर्मरसदानतः ।
फल्गु[4]व्यपगमात्तच्च सुगतक्षौद्रसारवत् ॥ १५ ॥

1. So A and T; *phullapadmakramadrumādhyaḥ*, B (two syllables in excess).
2. *vinirmuktaḥ*, B (one syllable in excess).
3. C evidently read *kṛpāmbubhiḥ*.
4. For *phalgu* cf. Pali *pheggu* (properly the 'sapwood' of a tree which covers the valuable heartwood) and *Mvy.*, 433, 7636.

पवित्रत्वाद्गुणद्रव्यदारिद्र्यविनिवर्तनात् ।
विमुक्तिफलदानाच्च[1] सुवर्णनिधिवृक्षवत् ॥ १६ ॥
धर्मरत्नात्मभावत्वाद् द्विपदाग्राधिपत्यतः ।
रूपरत्नाकृतित्वाच्च तद्रत्ननृप( 42*b* )बिम्बवत्[2] ॥ १७ ॥

यत्तु[3] द्विविधं लोकोत्तरमविकल्पं तत्पृष्ठलब्धं[4] च ज्ञानमाश्रयपरिवृत्तेर्हेतुर्विसं[5]योगफलसंज्ञितायाः। तत्कर्म स्वपरार्थसंपादनमित्युक्तम्। तत्र कतमा स्वपरार्थसंपत्। या सवासनक्लेशज्ञेयावरणविमोक्षादनावरणधर्मकायप्राप्तिरियमुच्यते स्वार्थसंपत्तिः। या त[6]दूर्ध्वमा लोकादनाभोगतः कायद्वयेन संदर्शनदेशनाविभुत्वद्वयप्रवृत्तिरियमुच्यते परार्थसंपत्तिरिति। तस्यां स्वपरार्थसं[7]पत्तौ कर्मार्थमारभ्य त्रयः श्लोकाः।

अनास्रवं व्याप्यविनाशधर्मि च
ध्रुवं शिवं शाश्वतमच्युतं पदम् ।
तथागतत्वं गगनोपमं सताम्
षडिन्द्रियार्थानुभवेषु कारणम् ॥ १८ ॥
विभूतिरूपार्थविदर्शने सदा
निमित्तभूतं सुकथाशुचिश्रवे ।
तथागतानां शुचिशीलजिघ्रणे
महार्यसद्धर्मरसाग्रविन्दने ॥ १९ ॥

1. So A; *ḥbras-bu smin-byed* (*phalapākāc ca*), T; 'it can give', C. *Smin* in T may be a corruption for *sbyin*.
2. *gser bzhin* (*hemavat*), T.
3. The I. O. copy of T has a sheet missing here, which goes down to half way through the commentary on verse 28; for the verses I have used the other translation of T.
4. *avikalpaṁ lokottara laukikaṁ vat tatpṛṣtha*°, B; according to O T omitted *laukikam* here, and so does C.
5. °*hetu visaṁ*°, B.
6. B om. *ta*.
7. B repeats *parārthasaṁ*.



समाधिसंस्पर्शसुखानुभूतिषु
स्वभावगाम्भीर्यनया[1]वबोधने ।
सुसूक्ष्मचिन्तापरमार्थगह्वरं[2]
तथागतव्योम निमित्तवर्जितम् ॥ २० ॥

अस्य खलु श्लोकत्रयस्यार्थः समासतोऽष्टाभिः श्लोकैर्वेदितव्यः।

कर्म ज्ञानद्वयस्यैतद्वेदितव्यं समासतः ।
पूरणं मुक्तिकायस्य धर्मकायस्य शोधनम् ॥ २१ ॥
विमुक्तिधर्मकायौ च वेदितव्यौ द्विरेकधा ।
अनास्रवत्वाद्व्यापित्वाद[3]संस्कृतपदत्वतः ॥ २२ ॥
अनास्रवत्वं क्लेशानां[4] सवासननि( 43*a* )रोधतः ।
असङ्गाप्रतिघातत्वाज्ज्ञानस्य व्यापिता मता ॥ २३ ॥
असंस्कृतत्वमत्यन्तमविनाशस्व[5]भावतः ।
अविनाशि[6]त्वमुद्देशस्तन्निर्देशो ध्रुवादिभिः ॥ २४ ॥
नाशश्चतुर्विधो ज्ञेयो ध्रुवत्वादिविपर्ययात् ।
पूतिर्विकृतिरुच्छित्तिरचिन्त्यनमनच्युतिः ॥ २५ ॥
तदभावाद्ध्रुवं ज्ञेयं शिवं शाश्वतमच्युतम् ।
पदं तदमलज्ञानं शुक्लधर्मास्पदत्वतः ॥ २६ ॥
यथानिमित्तमाकाशं निमित्तं रूपदर्शने ।
शब्दगन्धरसस्पृश्यधर्माणां च श्रवादिषु ॥ २७ ॥

1. *gāmbhīrya ca nayā*°, B (one syllable in excess).
2. For *gahvaram*, which was evidently read by C, T has *bde-mdzad*, *śaṁkaram*, a mistake which is quite natural palaeographically.
3. *anāsravād avyāpitvād*, B; A, T and C as in text.
4. B om. *nā*.
5. *atyantaviśanāsva*°, B.
6. B om. *śi*.

इन्द्रियार्थेषु धीराणामनास्रवगुणोदये ।
हेतुः कायद्वयं तद्वदनावरणयोगतः ॥ २८ ॥

यदुक्तमाकाशलक्षणो बुद्ध इति तत्पारमार्थिकमावेणिकं तथागतानां बुद्धलक्षणमभिसंधायोक्तम्। एवं ह्याह[1]। स चेद्द्वात्रिंशन्महापुरुषलक्षणैस्तथागतो द्रष्टव्योऽभविष्यत्तद्राजापि चक्रवर्ती तथागतोऽभविष्यदिति । तत्र परमार्थलक्षणे योगार्थमारभ्य श्लोकः ।

अचिन्त्यं नित्यं च ध्रुवमथ शिवं शाश्वतमथ
प्रशान्तं च व्यापि व्यपगतविकल्पं गगनवत् ।
असक्तं सर्वत्राप्रतिघपरुषस्पर्शविगतं
न दृश्यं न ग्राह्यं शुभमपि च बुद्धत्वममलम् ॥ २९ ॥

अथ खल्वस्य श्लोकस्यार्थः समासतोऽष्टाभिः श्लोकैर्वे[2]दितव्यः ।

विमुक्तिधर्मकायाभ्यां स्वपरार्थो निदर्शितः ।
स्वपरार्थाश्रये तस्मिन् योगोऽचिन्त्यादिभिर्गुणैः ॥ ३० ॥
अचिन्त्यमनुगन्तव्यं त्रिज्ञानाविषयत्वतः ।
(43b) सर्वज्ञज्ञानविषयं बुद्धत्वं ज्ञानदेहिभिः ॥ ३१ ॥
श्रुतस्याविषयः सौक्ष्म्याच्चिन्तायाः परमार्थतः ।
लौक्यादिभावनायाश्च धर्मतागह्वरत्वतः ॥ ३२ ॥
दृष्टपूर्वं न तद्यस्माद्बालैर्जात्यन्धकायवत् ।
आर्यैश्च सूतिकामध्यस्थित[3]बालार्कबिम्बवत् ॥ ३३ ॥
उत्पादविगमान्नित्यं निरोधविगमाद्ध्रुवम् ।
शिवमेतद्द्वयाभावाच्छाश्वतं धर्मतास्थितेः ॥ ३४ ॥

1. From the *Vajracchedikāsūtra* (ed. Anecd. Ox.), pp. 42-43, with a slight variation of wording.

2. A's xx*b* finishes here.

3. e.c.; *sūtikāmady(?)asthita*°, B; *btsas-paḥi khyim-nas*, T.



शान्तं निरोधसत्यत्वाद्व्यापि सर्वावबोधतः ।
अकल्पमप्रतिष्ठानादसक्तं क्लेशहानितः ॥ ३५ ॥
सर्वत्राप्रतिघं सर्वज्ञेयावरणशुद्धितः ।
परुषस्पर्शनिर्मुक्तं मृदुकर्मण्यभावतः ॥ ३६ ॥
अदृश्यं तदरूपित्वादग्राह्यमनिमित्ततः ।
शुभं प्रकृतिशुद्धत्वादमलं मलहानितः ॥ ३७ ॥

यत्पुनरेतदाकाशवदसंस्कृतगुणाविनिर्भाग[1]वृत्त्यापि तथागतत्वमा भवगतेर[2]चिन्त्यमहोपायकरुणाज्ञानपरिकर्म[3]विशेषेण जगद्धितसुखाधाननिमित्तममलैस्त्रिभिः स्वभाविकसांभोगिकनैर्माणिकैः कायैर[4]नुपरतमनुच्छिन्नमनाभोगेन प्रवर्तत इति द्रष्टव्यमावेणिकधर्मयुतत्वादिति । तत्र वृत्त्यर्थमा[5]रभ्य बुद्धकायविभागे चत्वारः श्लोकाः ।

अनादिमध्यान्तमभिन्नमद्वयं
त्रिधा विमुक्तं विमलाविकल्पकम् ।
समाहिता योगिनस्तत्प्रयत्नाः
पश्यन्ति यं धर्मधातुस्वभावम्[6] ॥ ३८ ॥
अमेयगङ्गासिकतातिवृत्तै-
र्गुणैरचिन्त्यैरसमैरुपेतः ।

1. °*guṇāvirbhoga*, B; *yon-tan dan rnam-par dbye-bas* (°*guṇa vinirbhāga*), T; C as in text.

2. *a bhagavater*, B; *srid-pa ji-srid-kyi bar-du*, T.

3. *thabs chen-po dan śes-rab-kyi yons-su spyod-paḥi* (*mahopāyaprajñāparikarma*°), T; C as in text.

4. B and T om. *kāyair*, supplied from C.

5. Reading not quite certain. *tatreme vṛttyartham* , B; *de-la ḥjug-paḥi don-las* (*tatra vṛtty*[or *pravṛtty*]*artham*), T.

6. *ya*(written over *sa*)*ddharma*°, B ; T's *gan yin* requires *yam*, corresponding to *sa* in 39. The change of metre in the second hemistich is odd; the metre does not appear to be known elsewhere.

सवासनोन्मूलितसर्व( 44a )दोष[1]-
स्तथागतानाममलः स धातुः[2] ॥ ३९ ॥
विचित्रसद्धर्ममयूखविग्रहै-
र्जगद्विमोक्षा[3]र्थसमाहृतोद्यमः ।
क्रियासु चिन्तामणिराजरत्नव-
द्विचित्रभावो न च तत्स्वभाववान् ॥ ४० ॥
लोकेषु यच्छान्तिपथावतार-
प्रपाचनाव्याकरणे निदानम् ।
बिम्बं तदप्यत्र सदावरुद्ध-
माकाशधाताविव रूपधातुः ॥ ४१ ॥

एषां खलु चतुर्णां श्लोकानां पिण्डार्थो विंशतिश्लोकैर्वेदितव्यः ।

यत्तद्बुद्धत्वमित्युक्तं सर्वज्ञत्वं स्वयंभुवाम् ।
निर्वृतिः[4] परमाचिन्त्यप्राप्तिः प्रत्यात्मवेदिता[5] ॥ ४२ ॥
तत्प्रभेदस्त्रिभिः कायैर्वृत्तिः[6] स्वाभाविकादिभिः ।
गाम्भीर्यौदार्यमाहात्म्यगुणधर्मप्रभावितैः ॥ ४३ ॥
तत्र स्वाभाविकः कायो बुद्धानां पञ्चलक्षणः ।
पञ्चाकारगुणोपेतो वेदितव्यः समासतः ॥ ४४ ॥
असंस्कृतमसंभिन्नमन्तद्वयविवर्जितम् ।
क्लेशज्ञेयसमापत्तित्रयावरणनिःसृतम् ॥ ४५ ॥

1. *doṣa tathā°*, B.
2. *amalo sau*, B (two syllables short); *dri-med dbyiṅs-pa de*, T.
3. B om. *kṣā*.
4. *nivṛttiḥ*, B; T and C as in text.
5. *pratyātmamadatā*, B; *so-soḥi bdag ḥgyur-ba*, T; 'experienced within the self', C.
6. *tatprabhedaḥ kāyair vṛttiḥ svābhāvikā°* , B (two syllables short); *de-dbye..sku gsum-dag-gis ḥjug*, T.



वैमल्यादविकल्पत्वाद्योगिनां गोचरत्वतः ।
प्रभास्वरं विशुद्धं च धर्मधातोः स्वभावतः ॥ ४६ ॥
अप्रमेयैरसंख्येयैरचिन्त्यैरसमैर्गुणैः ।
विशुद्धिपारमीप्राप्तैर्युक्तं स्वाभाविकं वपुः ॥ ४७ ॥
उदारत्वादगण्यत्वात्[1] तर्कस्यागोचरत्वतः ।
कैवल्याद्वासनोच्छित्तेरप्रमेयादयः क्रमात् ॥ ४८ ॥
विचित्रधर्मसंभोगरूप[2]धर्मावभासतः ।
करुणाशुद्धिनिष्यन्दसत्त्वार्थास्रंसनत्वतः ॥ ४९ ॥
निर्विकल्पं निराभोगं यथाभिप्रायपूरितः ।
चिन्तामणिप्रभावर्द्धेः सांभोगस्य व्यव( 44b )स्थितिः॥५०॥
देशने दर्शने कृत्यास्रंसनेऽनभिसंस्कृतौ[3] ।
अतत्स्वभावाख्याने च चित्रतोक्ता च पञ्चधा ॥ ५१ ॥
रङ्गप्रत्ययवैचित्र्यादतद्भावो यथा मणेः ।
सत्त्वप्रत्ययवैचित्र्यादतद्भावस्तथा विभोः ॥ ५२ ॥
महाकरुणया कृत्स्नं लोकमालोक्य लोकवित् ।
धर्मकायादविरलं[4] निर्माणैश्चित्ररूपिभिः ॥ ५३ ॥
जातकान्युपपत्ति[5] च तुषितेषु च्युतिं ततः ।
गर्भा[व]क्रमणं जन्म शिल्पस्थानानि कौशलम् ॥ ५४ ॥

1. *agamyatvāt*, B; *graṅs-med phyir*, T; C supports T.
2. For *rūpa* T has *raṅ-bzhin* (*saṁbhogamaya°* ?); but C appears to support the text.
3. *°sraṁsanenābhi°*, B; *mdzad-rgyun mi-ḥchad daṅ mṅon-par ḥdu-byed med-pa*, T.
4. *ma g'yos-par* (*avicalaṁ*), T. C om. verse 53.
5. B's reading of the fourth letter is not quite certain; T evidently read *jātakābhyupapattiṁ* (*skye-ba mṅon-par skye-ba daṅ*).

अन्तःपुररतिक्रीडां नैष्क्रम्यं दुःखचारिकाम्[1] ।
बोधिमण्डोपसंक्रान्तिं मारसैन्यप्रमर्दनम् ॥ ५५ ॥
संबोधिं धर्मचक्रं च निर्वाणाधिगमक्रियाम्[2] ।
क्षेत्रेष्वपरिशुद्धेषु दर्शयत्या भवस्थितेः ॥ ५६ ॥
अनित्यदुःखनैरात्म्यशान्तिशब्दैरुपायवित् ।
उद्वेज्य त्रिभवात् सत्त्वान् प्रतारयति निर्वृतौ ॥ ५७ ॥
शान्तिमार्गावतीर्णांश्च प्राप्यनिर्वाण[3]संज्ञिनः ।
सद्धर्मपुण्डरीकादिधर्मतत्त्वप्रकाशनैः ॥ ५८ ॥
पूर्वग्रहान्निवर्त्यैतान् प्रज्ञोपायपरिग्रहात् ।
परिपाच्योत्तमे याने व्याकरोत्यग्रबोधये ॥ ५९ ॥
सौक्ष्म्यात्[4] प्रभावसंपत्तेर्बालसार्थाति[5]वाहनात् ।
गाम्भीर्यौदार्यमाहात्म्यमेषु ज्ञेयं यथाक्रमम् ॥ ६० ॥
प्रथमो धर्मकायोऽत्र रूपकायौ तु पश्चिमौ ।
व्योम्नि रूपगतस्येव[6] प्रथमेऽन्त्यस्य वर्तनम् ॥ ६१ ॥

तस्यैव कायत्रयस्य जगद्धितसुखाधानवृत्तौ नित्यार्थमारभ्य श्लोकः ।

हेत्वानन्त्यात्[7] सत्त्वधात्वक्षयत्वात्
कारुण्यर्द्धि[8]ज्ञानसंपत्तियोगात् ।

1. *cārikā* in this sense is apparently confined to Buddhist texts.
2. B om. *dhi*; T does not show the preposition and read °*kriyāḥ* (*mdzad-rnams*).
3. T's *mya-ṅan ḥdas thob* suggests *prāptanirvāṇa*° ; C's version is free, but seems to imply the text.
4. So C; *saukhyāt*, B; *zab* (!, *gāmbhīryāt*), T.
5. *bālasārvā*°, B; *byis-pa don-mthun*, T; C may possibly have read *bālasattvā*°.
6. *śiṣyagatasyeva*, B; *gzugs gnas bzhin*, T; 'just as all forms are in space', C.
7. *hetvātyantyāt*, B; C and T as in text.
8. *kāruṇyar*(?)*di*°, B; *brtse daṅ ḥphrul*, T; C uncertain.



धर्मैश्वर्यान्मृत्युमारावभङ्गान्
नैःस्वा( 45*a* )भाव्याच्छाश्वतो लोकनाथः ॥ ६२ ॥

अस्य पिण्डार्थः षड्भिः श्लोकैर्वेदितव्यः ।

कायजीवितभोगानां त्यागैः सद्धर्मसंग्रहात् ।
सर्वसत्त्वहितायादिप्रतिज्ञोत्तरणत्वतः ॥ ६३ ॥
बुद्धत्वे सुविशुद्धायाः करुणायाः प्रवृत्तितः ।
ऋद्धिपादप्रकाशाच्च[1] तैरवस्थानशक्तितः ॥ ६४ ॥
ज्ञानेन भवनिर्वाणद्वयग्रहविमुक्तितः ।
सदाचिन्त्यसमाधानसुखसंपत्तियोगतः ॥ ६५ ॥
लोके विचरतो लोकधर्मैरनुपलेपतः ।
शमामृतपदप्राप्तौ मृत्युमाराप्रचारतः ॥ ६६ ॥
असंस्कृतस्वभावस्य मुनेरादिप्रशान्तितः ।
नित्यमशरणानां[3] च शरणाभ्युपपत्तितः[4] ॥ ६७ ॥
सप्तभिः कारणैराद्यैर्नित्यता रूपकायतः ।
पश्चिमैश्च त्रिभिः शास्तुर्नित्यता धर्मकायतः ॥ ६८ ॥

स चायमाश्रयपरिवृत्तिप्रभावितस्तथागतानां प्राप्तिनयोऽचिन्त्यनयेनानुगन्तव्य इति । अचिन्त्यार्थमारभ्य श्लोकः ।

अवाच्यत्वात् परमार्थसंग्रहा-
दतर्कभूमेरुपमानिवृत्तितः ।

1. e.c. Pāda *c* is corrupt in B, which omits two characters, leaving a gap and reading *pādaprave*(?)*tuś*(?)*ca*; *rdzu-ḥphrul rkaṅ-ba ston-pa ni*, T, which may be tentatively reconstructed as in the text; C agrees with T in sense.
2. *samā*°, B; *zhi-ba*, T.
3. *nityatā śaraṇānāṁ*, B; *rtag-pa skyabs-med-rnams-kyi*, T.
4. *skyabs-la-sogs-pa ḥthad-phyir* (*śaraṇādyupapattitaḥ*), T.

निरुत्तरत्वाद्भवशान्त्यनुद्ग्रहा-
दचिन्त्य आर्यैरपि बुद्धगोचरः ॥ ६९ ॥

अस्य पिण्डार्थश्चतुर्भिः श्लोकैर्वेदितव्यः ।

अचिन्त्योऽनभिलाप्यत्वादलाप्यः परमार्थतः ।
परमार्थोऽप्रतर्क्यत्वादतर्क्यो व्यनुमेयतः[1] ॥ ७० ॥
व्यनुमेयोऽनुत्तरत्वादानुत्तर्यमनुद्ग्रहात् ।
अनुद्ग्रहोऽप्रतिष्ठानादगुणदोषाविकल्पनात् ॥ ७१ ॥
पञ्चभिः कारणैः[2] सौक्ष्म्यादचिन्त्यो धर्मकायतः ।
षष्ठेनातत्त्वभावित्वादचिन्त्यो रूपकायतः ॥ ७२ ॥
अनुत्तरज्ञानमहाकृपादिभि-
र्गुणैरचिन्त्या गुणपारगा जिनाः ।
( 45b ) अतः क्रमोऽन्त्योऽयमपि स्वयंभुवो[3]
ऽभिषेकलब्धा न महर्षयो विदुरिति[4] ॥ ७३ ॥

इति रत्नगोत्रविभागे महायानोत्तरतन्त्रशास्त्रे[5] बोध्यधिकारो नाम द्वितीयः परिच्छेदः ॥२॥

------

1. C evidently read *'nupameyataḥ* or *vyupameyataḥ* against B and T.

2. O translates 'out of four motives', evidently a slip in view of *c*.

3. So T understands the line, taking *svayaṁbhuvo* as genitive, but the reading may be *yam*, 'which', not *'yam*.

4. T om. *iti*, and C the whole stanza. The reference in the last line is to the Bodhisattvas in the tenth stage.

5. *°tantrasāre*, B; *bstan-bcos*, T.

## III

उक्ता निर्मला तथता । ये तदाश्रिता मणिप्रभावर्णसंस्थानवदभिन्नप्रकृतयो-ऽत्यन्तनिर्मला गुणास्त इदानीं वक्तव्या इति । अनन्तरं बुद्धगुणविभागमारभ्य श्लोकः ।

स्वार्थः[1] परार्थः परमार्थकाय[2]-
स्तदाश्रिता संवृतिकायता च ।
फलं विसंयोगविपाकभावा-
देतच्चतुः[3]षष्टिगुणप्रभेदम् ॥ १ ॥

किमुक्तं भवति ।

आत्मसंपत्त्यधिष्ठानं शरीरं पारमार्थिकम् ।
परसंपत्त्यधिष्ठानमृषेः सांकेतिकं वपुः ॥ २ ॥
विसंयोगगुणैर्युक्तं वपुराद्यं बलादिभिः ।
वैपाकिकैर्द्वितीयं तु महापुरुषलक्षणैः ॥ ३ ॥

अतः परं ये च बलादयो यथा चानुगन्तव्यास्तथतामधिकृत्य ग्रन्थः ।

बलत्वमज्ञानवृतेषु वज्रव-
द्विशारदत्वं परिषत्सु सिंहवत् ।
तथागतावेणिकतान्तरीक्षवन्
मुनेर्द्विधादर्शनमम्बुचन्द्रवत् ॥ ४ ॥

बलान्वित इति ।

स्थानास्थाने विपाके च कर्मणामिन्द्रियेषु च ।
धातुष्वप्यधिमुक्तौ च मार्गे सर्वत्रगामिनि ॥ ५ ॥

1. *svārtha*, B.
2. *paramārthakāyatā*, B.
3. B om. visarga.

ध्यानादिक्लेशवैमल्ये निवासानुस्मृतावपि ।
दिव्ये चक्षुषि शान्तौ[1] च ज्ञानं दशविधं बलम् ॥ ६ ॥

वज्रवदिति ।

स्थानास्थानविपाकधातुषु जगन्नानाधिमुक्तौ नये
संक्लेशव्यवदान इन्द्रिय(46a)गणे पूर्वे निवासस्मृतौ ।
दिव्ये चक्षुषि चास्रवक्षयविधावज्ञानवर्मा[2]चल-
प्राकार[3]द्रुमभेदनप्रकिरणच्छेदाद्बलं वज्रवत्[4] ॥ ७ ॥

चतुर्वैशारद्यप्राप्त इति ।

सर्वधर्माभिसंबोधे विबन्धप्रतिषेधने ।
मार्गाख्याने निरोधाप्तौ वैशारद्यं चतुर्विधम् ॥ ८ ॥
ज्ञेये वस्तुनि सर्वथात्मपरयोर्ज्ञानात् स्वयंज्ञापना[5]-
द्धेये वस्तुनि हानिकारणकृतेः[6] सेव्ये विधौ सेवनात् ।
प्राप्तव्ये च निरुत्तरेऽतिविमले प्राप्तेः परप्रापणा-
दार्याणां स्वपरार्थसत्यकथनादस्तम्भितत्वं क्वचित् ॥ ९ ॥

सिंहवदिति ।

नित्यं वनान्तेषु यथा मृगेन्द्रो
निर्भीरनुत्त्रस्तगतिर्मृगेभ्यः ।

1. For *śāntau* T has *ldan-pa* (*yoge*); C as in text.
2. °*dharmā*°, B; *go-cha*, T; 'armour', C.
3. °*prakāra*°, B; *rtsig*, T; 'wall', C.
4. C puts verse 7 after verse 28.
5. e.c.; B's reading is uncertain, possibly *jñānātm*(or *s*) *ayajñāpanād*; T has nothing to represent the two doubtful syllables, and of the possibilities *svayam* alone makes any sort of sense. But the difficulty is that the sentence is complete without it, and neither T nor C give any clear indication of what their texts read.
6. *hānikāraṇakṣateḥ*, B; *spaṅs dan spoṅ-mdzad*, T.



मुनीन्द्रसिंहोऽपि तथा गणेषु
स्वस्थो निरास्थः[1] स्थिरविक्रमस्थः ॥ १० ॥

अष्टादशावेणिकबुद्धधर्मसमन्वागत इति ।

स्खलितं रवितं नास्ति शास्तुर्न मुषिता स्मृतिः ।
न चासमाहितं चित्तं नापि नानात्वसंज्ञिता ॥ ११ ॥
नोपेक्षाप्रतिसंख्याय हानिर्न च्छन्दवीर्यतः ।
स्मृतिप्रज्ञाविमुक्तिभ्यो विमुक्तिज्ञानदर्शनात् ॥ १२ ॥
ज्ञानपूर्वंगमं कर्म त्र्यध्वज्ञानमनावृतम् ।
इत्येतेऽष्टादशान्ये च गुरोरावेणिका गुणाः ॥ १३ ॥
नास्ति प्रस्खलितं रवो मुषितता चित्ते (48a) न संभेदतः[2]
संज्ञा न[3] स्वरसाध्युपेक्षणमृषे[4]र्हानिर्न च च्छन्दतः ।
वीर्याच्च स्मृतितो विशुद्धविमलप्रज्ञाविमुक्तेः सदा
मुक्ति[5]ज्ञाननिदर्शनाच्च निखिलज्ञेयार्थसंदर्शनात् ॥ १४ ॥
सर्वज्ञानपुरोजवानुपरिवर्त्यर्थेषु[6] कर्मत्रयं
त्रिष्वध्वस्वपराहता[7] सुविपुलज्ञानप्रवृत्तिर्ध्रुवम् ।

1. *svastho pi nirāsvasthaḥ*, B. C puts this verse after verse 30. For it cf. *Kāś. P.* 36, p. 65.

2. *na bhedataḥ*, B (one syllable short). B goes on from *citta* to iv, 9, and the text resumes in 48*a*, line 4. Evidently one or more leaves were displaced in the MS. from which B was copied.

3. B om. *na*.

4. *ṛṣe*, B.

5. *vimukti*°, B.

6. *artheṣu* is a doubtful reading in B, for which T's *gaṅ-gis* suggests a relative instead. C is no help.

7. B is not quite clear and might be read as *aparāvṛtā*, and C suggests a form from *vṛ*; T's *thogs-pa med-pa* agrees best with the text (e.g. *thogs-med*=*avyāhata* elsewhere).

इत्येषा जिनता[1] महाकरुणया युक्तावबुद्धा[2] जिनै-
र्यद्बोधाज्जगति प्रवृत्तमभय[3]दं सद्धर्मचक्रं महत् ॥ १५ ॥

आकाशवदिति ।

या क्षित्यादिषु धर्मता न नभसः सा धर्मता विद्य(48b)ते
ये चानावरणादिलक्षणगुणा व्योम्नो न ते रूपिषु ।
क्षित्यम्बुज्वलनानिलाम्बरसमा लोकेषु साधारणा
बुद्धावेणिकता न चाश्वपि पुनर्लोकेषु साधारणा[4] ॥ १६ ॥

द्वात्रिंशन्महापुरुषलक्षणरूपधारीति ।

सुप्रतिष्ठितचक्राङ्कव्यायतोत्सङ्ग[5]पादता ।
दीर्घाङ्गुलिकता जालपाणिपादावनद्धता ॥ १७ ॥
त्वङ्मृदुश्रीतरुणता सप्तोत्सदशरीरता ।
एणेयजङ्घता नागकोशवद्व[6]स्तिगुह्यता ॥ १८ ॥
सिंहपूर्वार्धकायत्वं निरन्तरचितांशता[7] ।
संवृत्तस्कन्धता वृत्तश्लक्ष्णानुन्नाम[8]बाहुता ॥ १९ ॥

1. *janatā*, B; *rgyal-ba-ñid*, T; '*Tathāgatatva*', C.
2. *brñes* (*avalabdhā*), T.
3. B repeats *ya*.
4. *na cāśva puna*, B (one syllable short); *sādhāraṇāḥ*, B. T has for the line *ma-ḥdres-ñid ni rdul dran tsam yaṅ ḥjig-rten-dag-na thun-moṅ min*, omitting Buddha and substituting a word which I cannot determine; it may have read *cāṇv* for *cāśv*. For *āśu* cf. *S.*,vi,9, and note in text. C puts this verse after verse 34.
5. *ucchaṅka* is the more usual form, found in the *Mvy.* and *Abhisamayālaṁkārāloka*.
6. B om. *dva*; *glaṅ-po bzhin-du*, T.
7. *citāṅgatā*, B; *thal-gon..rgyas-pa*, T. Cf. *Mvy.*, 251.
8. °*ślakṣṇanu(?)nnāma*°, B; *phyag ḥjam-riṅ zhum zhiṅ mthon dman-med*, T. Prof. Bailey has found verses 19*cd* to 22 transliterated in the Paris MS., Pelliot 2740; it reads here *śilaṣanau nāmabahūtta*, which supports the text.



प्रलम्बबाहुता शुद्धप्रभामण्डलगात्रता ।
कम्बुग्रीवत्वममलं मृगेन्द्रहनुता समा ॥ २० ॥
चत्वारिंशद्दशनता स्वच्छाविरलदन्तता ।
विशुद्धसमदन्तत्वं[1] शुक्लप्रवरदंष्ट्रता ॥ २१ ॥
प्रभूतजिह्वतानन्ताचिन्त्यरसरसाग्रता ।
कलविङ्करुतं[2] ब्रह्मस्वरता च स्वयंभुवः ॥ २२ ॥
नीलोत्पलश्रीवृषपक्ष्मनेत्र-
सितामलोर्णोदितचारुवक्त्रः ।
उष्णीषशीर्षव्यवदातसूक्ष्म-
सुवर्णवर्णच्छविरग्रसत्त्वः ॥ २३ ॥
एकैकविश्लिष्टमृदूर्ध्वदेह-
प्रदक्षिणावर्तसुसूक्ष्मरोमा ।
महेन्द्रनीलामलरत्नकेशो[3]
न्यग्रोधपूर्ण[4]द्रुममण्डलाभः ॥ २४ ॥
नारायणस्थामदृढात्मभावः
समन्तभद्रोऽप्रतिमो महर्षिः ।
द्वात्रिंशदेतान्यमितद्युतीनि
नरेन्द्रचिह्नानि वदन्ति शास्तुः ॥ २५ ॥

दकचन्द्रवदिति ।

व्यभ्रे यथा नभसि चन्द्रमसो विभूतिं
पश्यन्ति नीलशरदम्बुमहाह्र(49*a*)दे[5] च ।

1. °*dantatā klapravara*°, B (one syllable short and unmetrical); *dkar-pa* (for *dkar-po*), T.
2. °*ruta*, B.
3. °*kośo*, B; *dbu-skra*, T.
4. °*pūrṇno*, B; *rdzogs-paḥi ljon-śiṅ*, T.
5. *hradeṣu*, B (one syllable in excess); T does not show the plural.

संबुद्धमण्डलतलेषु विभोर्विभूतिं
तद्वज्जिनात्मजगणा व्यवलोकयन्ति ॥ २६ ॥

इतीमानि दश तथागतबलानि चत्वारि वैशारद्यान्यष्टादशावेणिका बुद्धधर्मा द्वात्रिंशच्च महापुरुषलक्षणान्येकेनाभिसंक्षिप्य चतुःषष्टिर्भवन्ति ।

गुणाश्चैते चतुःषष्टिः सनिदानाः[1] पृथक् पृथक् ।
वेदितव्या यथासंख्यं रत्नसूत्रानुसारतः ॥ २७ ॥

एषां खलु यथोद्दिष्टानामेव चतुःषष्टेस्तथागतगुणानामपि यथानुपूर्व्या विस्तरविभागे निर्देशो रत्नदारिकासूत्रानुसारेण वेदितव्यः । यत्पुनरेषु स्थानेषु चतुर्विधमेव यथाक्रमं वज्रसिहाम्बरदकचन्द्रोदाहरणमुदाहृतमस्यापि पिण्डार्थो द्वादशभिः श्लोकैर्वेदितव्यः ।

निर्वेधिकत्वनिर्दैन्यनिष्कैवल्यनिरीहतः ।
वज्रसिंहाम्बरस्वच्छदकचन्द्रनिदर्शनम् ॥ २८ ॥
बलादिषु बलैः षड्भिस्त्रिभिरेकेन च क्रमात् ।
सर्वज्ञेयसमापत्तिसवासनमलोद्धृतेः ॥ २९ ॥
भेदाद्विकरणा[2]च्छेदाद्वर्मप्राकारवृक्षवत् ।
गुरुसारदृढाभेद्यं वज्रप्रख्यमृषेर्बलम् ॥ ३० ॥
गुरु[3] कस्माद्यतः सारं सारं कस्माद्यतो दृढम् ।
दृढं कस्माद्यतोऽभेद्यमभेद्यत्वाच्च वज्रवत् ॥ ३१ ॥
निर्भयत्वान्निरास्थत्वा[4]त्स्थैर्याद्विक्रमसंपदः ।
पर्षद्गणेष्ववशारद्यं मुनिसिंहस्य सिंहवत् ॥ ३२ ॥

1. °ṣaṣtih anidānāḥ, B; *rgyu bcas*, T; C also indicates the text.

2. *vikarana* here is translated in T by the same word as *prakirana* in iii, 7; possibly the correct reading is not *vikaraṇāc* nor *vikiraṇāc*, but *vidāraṇāc*.

3. B om. *ru*, and C the whole verse.

4. *nirāndhatvāt*, B; *ltos-med phyir*, T; '*svastha*', C.



सर्वाभिज्ञतया स्वस्थो विहरत्यकुतोभयः ।
निरास्थः शुद्धसत्त्वेभ्योऽप्यात्मनोऽसमदर्शनात् ॥ ३३ ॥
स्थि( 49b )रो नित्यसमाधाना[1]त् सर्वधर्मेषु चेतसः ।
विक्रान्तः परमाविद्यावासभूमिव्यतिक्रमात् ॥ ३४ ॥
लौकिकश्रावकैकान्तचारिधीमत्स्वयंभुवाम्[2] ॥
उत्तरोत्तरधीसौक्ष्म्यात् पञ्चधा तु निदर्शनम् ॥ ३५ ॥
सर्वलोकोपजीव्यत्वाद्भूम्यम्ब्वग्न्यनिलोपमाः ।
लौक्यलोकोत्तरातीतलक्षणत्वान्नभोनिभाः ॥ ३६ ॥
गुणा द्वात्रिंशदित्येते[3] धर्मकायप्रभाविताः ।
मणिरत्नप्रभावर्णसंस्थानवदभेदतः ॥ ३७ ॥
द्वात्रिंशल्लक्षणाः काये दर्शनाह्लादका गुणाः ।
निर्माणधर्मसंभोगरूपकायद्वयाश्रिताः ॥ ३८ ॥
शुद्धेर्दूरान्तिकस्थानां लोकेऽथ जिनमण्डले ।
द्विधा तद्दर्शनं शुद्धं[4] वारिव्योमेन्दुबिम्बवत् ॥ ३९ ॥

इति रत्नगोत्रविभागे महायानोत्तरतन्त्रशास्त्रे गुणाधिकारो नाम त्रितीयः परिच्छेदः ॥३॥

--------

1. B om. *nā*.

2. *laukikai śrāvakaiḥ kānta°.. °bhuvā*, B; T and C indicate the text.

3. B om. *te*.

4. *dvidhātu ddarśanaṁ*, B; *de mthoṅ-ba*, T. C suggests the reading *śuddhavāri°*; T omits *śuddham*, unless *chu daṅ* is a mistake for *chu dag*, in which case it had the same text as C.

# IV

उक्ता विमला बुद्धगुणाः। तत्कर्म जिनक्रियेदानीं वक्तव्या। सा पुनरनाभोगतश्चाप्रश्रब्धितश्च समासतो द्वाभ्यामाकाराभ्यां[1] प्रवर्तत इति। अनन्तरमनाभोगाप्रश्रब्धं[2] बुद्धकार्यमारभ्य द्वौ श्लोकौ।

विनेयधातौ विनयाभ्युपाये
विनेयधातोर्विनयक्रियायाम्।
तद्देशकाले गमने च नित्यं
विभोरनाभोगत एव वृत्तिः॥ १॥

कृत्स्नं निष्पाद्य[3] यानं प्रवरगुणगणज्ञानरत्नस्वगर्भं
पुण्यज्ञानार्करश्मिप्रविसृतविपुला[4]नन्तमध्याम्बराभम्।
बुद्धत्वं सर्वसत्त्वे विमलगुणनिधिं[5] निर्विशिष्टं विलोक्य
क्लेशज्ञेयाभ्रजालं विधमति करुणा वायुभूता जिनानाम्॥२॥

(50a) एतयोर्यथाक्रमं द्वाभ्यामष्टाभिश्च श्लोकैः पिण्डार्थो वेदितव्यः।

यस्य येन च यावच्च यदा च विनयक्रिया।
तद्विकल्पोदयाभावादनाभोगः सदा मुनेः॥ ३॥
यस्य धातोर्विनेयस्य येनोपायेन भूरिणा।
या विनीतिक्रिया यत्र यदा तद्देशकालयोः॥ ४॥
निर्याणे तदुपस्तम्भे तत्फले तत्परिग्रहे।
तदावृतौ तदुच्छित्तिप्रत्यये चाविकल्पतः[6]॥ ५॥

1. *akārābhyāṁ*, B.

2. *apratisrabdham*, B, but *pra* is the regular preposition, or else *pratipra* combined.

3. *nirmathya*, B; *ṅes-par bsgrubs-te*, T; 'realizing', C.

4. B seems to read *vimalā°*; *rgya chen*, T; 'widespread', C.

5. *°nidhi*, B (against the metre). B omits *vi* in *vimala*; *dri-ma med*, T; C also as in text.

6. e.c.; *vāvikalpataḥ*, B; T does not show either *ca* or *vā*.



भूमयो दश निर्याणं तद्धेतुः संभृतिद्वयम्।
तत्फलं परमा बोधिर्बोधिः सत्त्वः परिग्रहः[1]॥ ६॥
तदावृतिरपर्यन्तक्लेशोपक्लेशवासनाः।
करुणा तत्समु[2]द्घातप्रत्ययः सार्वकालिकः॥ ७॥
स्थानानि वेदितव्यानि षडेतानि यथाक्रमम्।
महोदधिरविव्योमनिधानाम्बुदवायुवत्॥ ८॥
ज्ञानाम्बुगुणरत्नत्वादग्रयानं (46a) समुद्रवत्।
सर्वसत्त्वोपजीव्यत्वात् संभारद्वयमर्कवत्[3]॥ ९॥
विपुलानन्तमध्यत्वाद्बोधिराकाशधातुवत्।
सम्यक्संबुद्धधर्मत्वात् सत्त्वधातुर्निधानवत्॥ १०॥
आगन्तुव्याप्त्यनिष्प (46b) त्तेस्तत्संक्लेशोऽभ्रराशिवत्।
तत्क्षिप्तिप्रत्युपस्थानात् करुणोद्वृत्तवायुवत्॥ ११॥
पराधि[4]कारनिर्याणात् सत्त्वात्मसमदर्शनात्।
कृत्यापरिसमाप्तेश्च क्रियाप्रश्रब्धिरा भवात्॥ १२॥

यदनुत्पादानिरोधप्रभावितं बुद्धत्वमित्युक्तं तत्कथमिहासंस्कृतादप्रवृ[5]त्तिलक्षणाद्बुद्धत्वादनाभोगाप्रतिप्रश्रब्धमा लोकादविकल्पं बुद्धकार्यं प्रवर्तत इति। बुद्धमाहात्म्यधर्म[6]तामारभ्य विमतिसंदेहजातानामचिन्त्यबुद्धविषयाधिमुक्तिसंजननार्थं तस्य माहात्म्ये श्लोकः।

शक्रदुन्दुभिवन् मेघब्रह्मार्कमणिरत्नवत्।
प्रतिश्रुतिरिवाकाशपृथिवीवत् तथागतः॥१३॥

1. *satvaparigrahaḥ*, B.
2. B om. *mu*.
3. *dvayakarmavat*, B; *gñis-dag ni ñi-ma bzhin*, T; C as in text.
4. The syllable *dhi* is uncertain in B; *gzhan-gyi dbaṅ-gyis*, T. C omits the hemistich.
5. B om. *vṛ*.
6. B om. *rma*.

अस्य खलु सूत्रस्थानीयस्य श्लोकस्य यथाक्रमं परिशिष्टेन ग्रन्थेन विस्तर-विभागनिर्देशो वेदितव्यः ।

शक्रप्रतिभासत्वादिति ।

विशुद्धवैडूर्यमयं यथेदं स्यान्महीतलम् ।
स्वच्छत्वात्तत्र दृश्येत देवेन्द्रः साप्सरोगणः ॥ १४ ॥
प्रासादो वैजयन्तश्च तदन्ये च दिवौकसः ।
तद्विमानानि चित्राणि ताश्च दिव्या विभूतयः ॥ १५ ॥
अथ नारीनरगणा महीतलनिवासिनः ।
प्रतिभासं तमालोक्य प्रणिधिं कुर्युरीदृशम् ॥ १६ ॥
अद्यैव न चिरादेवं[1] भवेमस्त्रिदशेश्वराः ।
कुशलं च समादाय वर्तेरंस्तदवाप्तये ॥ १७ ॥
प्रतिभासोऽयमित्येवमविज्ञायापि ते भुवः[2] ।
च्युत्वा दि[3]व्युपपद्येरंस्तेन शुक्लेन कर्मणा ॥ १८ ॥
प्रतिभासः स चात्यन्तमविकल्पो नि(47*a*)रीहकः ।
एवं च महतार्थेन भुवि स्यात्प्रत्युपस्थितः ॥ १९ ॥
तथा श्रद्धादिविमले[4] श्रद्धादिगुणभाविते ।
सत्त्वाः पश्यन्ति संबुद्धं प्रतिभासं[5] स्वचेतसि ॥ २० ॥
लक्षणव्यञ्जनोपेतं[6] विचित्रेर्यापथक्रियम् ।
चङ्क्रम्यमाणं तिष्ठन्तं निषण्णं शयनस्थितम् ॥ २१ ॥

1. Reconstruction uncertain; the first three syllables are illegible in B, and the fourth uncertain but not like *na*; *deṅ kyaṅ riṅ-na mi-thogs-par*, T.
2. Pāda *b* is much rubbed in B, but the text seems certain.
3. B om. *di*.
4. B is not clear and may read *śravādivimale*; T as in text.
5. B om. anusvāra.
6. B om. anusvāra.



भाषमाणं शिवं धर्मं तूष्णींभूतं[1] समाहितम् ।
चित्राणि प्रातिहार्याणि दर्शयन्तं महाद्युतिम् ॥ २२ ॥
तं च दृष्ट्वाभियुज्यन्ते बुद्धत्वाय स्पृहान्विताः ।
तद्धेतुं च समादाय प्राप्नुवन्तीप्सितं पदम् ॥ २३ ॥
प्रतिभासः स चात्यन्तमविकल्पो निरीहकः ।
एवं च महतार्थेन लोकेषु प्रत्युपस्थितः ॥ २४ ॥
स्वचित्तप्रतिभासोऽयमिति नैवं पृथग्जनाः ।
जानन्त्यथ च तत्तेषामवन्ध्यं बिम्बदर्शनम् ॥ २५ ॥
तद्धि दर्शनमागम्य क्रमादस्मिन्नये स्थिताः ।
सद्धर्मकायं[2] मध्यस्थं पश्यन्ति ज्ञानच[3]क्षुषा ॥ २६ ॥
भूर्यद्वत्स्यात् समन्तव्यपगतविषमस्थानान्तरमला
वैडूर्यस्पष्टशुभ्रा विमलमणिगुणा श्रीमत्समतला ।
शुद्धत्वात्तत्र बिम्बं सुरपतिभवनं माहेन्द्रमरुता-
मुत्पद्येत क्रमेण क्षितिगुणविगमादस्तं पुनरियात् ॥२७॥
तद्भावायोपवासव्रतनियमतया दानाद्यभिमुखाः
पुष्पादीनि क्षिपेयुः प्रणिहितमनसो नारीनरगणाः ।
वैडूर्यस्वच्छभूते मनसि मुनिपतिच्छायाधिगमने
चित्राण्युत्पादयन्ति प्रमुदितमनसस्तद्वज्जिनसुताः ॥२८॥
यथैव वैडूर्यमहीतले शुचौ
सुरेन्द्रकायप्रतिबिम्बसंभवः ।
तथा ज(47*b*)गच्चित्तमहीतले शुचौ
मुनीन्द्रकायप्रतिबिम्बसंभवः ॥ २९ ॥

1. *tūṣṇībhūtaṁ*, B.
2. °*kāya*, B.
3. B om. *ca*.

बिम्बोदयव्ययमनाविलताविलस्व-
चित्तप्रवर्तनवशाज्जगति प्रवृत्तम् ।
लोकेषु यद्वदवभासमुपैति बिम्बं
तद्वन्न तत्सदिति नासदिति[1] प्रपश्येत् ॥ ३० ॥

देवदुन्दुभिवदिति ।

यथैव दिवि देवानां पूर्वशुक्लानुभावतः ।
यत्नस्थानमनोरूपविकल्परहिता सती ॥ ३१ ॥
अनित्यदुःखनैरात्म्यशान्तशब्दैः प्रमादिनः ।
चोदयत्यमरान् सर्वानसकृद्देवदुन्दुभिः ॥ ३२ ॥
व्याप्य बुद्धस्वरणैवं विभुर्जगदशेषतः ।
धर्मं दिशति भव्येभ्यो यत्नादिरहितोऽपि सन् ॥ ३३ ॥
देवानां दिवि दिव्यदुन्दुभिरवो यद्वत् स्वकर्मोद्भवो
धर्मोदाहरणं मुनेरपि तथा लोके स्वकर्मोद्भवम् ।
